सिंहव्याघ्रमृगादीनां [गजगोऽजाविपक्षिणाम् ।
वृक्षगुल्मलतादीनाम् आकारं विश्वतोऽपरम् ।][7]
स्वरूपेणैव ते जीवास्तादृशानन्त[8]संख्यकाः ।
गुणैरनन्तसंख्याकैः[9] प्रत्येकमपि चान्विताः ।

---

1. पिशाचानां - अ
2. 'तिर्यग्जन्तूनां' - नास्ति - अ
3. 'स नवमः'- नास्ति - अ
4. सूक्ष्मरूपेण - प्रा-1, प्रा-2
5. पश्वादिजीवराशिं - प्रा-1, प्रा-2
6. पुरुषाकाराः - प्रा-1, प्रा-2
7. अत्रावरणान्तर्गते भागे 'आकारं भजते परे ।
   अपरे सदृशाकाराः झषमीनादियादसाम् ।' - अ
8. तादृशानन - प्रा-1, प्रा-2
9. गुणैरनेकसंख्याकैः - अ

सात्त्विकाः श्वेतरूपास्तु[1] श्यामास्तत्रैव तामसाः ।
तत्रापि तारतम्येन श्वेतश्वेततरादिकम् ।
यत्र[2] योग्यतया सर्वे राजसाः शबलास्तथा ।
तत्तदाकारसदृशैः लिङ्गदेहैरनादिभिः ।
कञ्चुकैरिव सञ्छन्ना[3] स्तादृग्वर्णैः[4] पृथक् पृथक् ।
इन्द्रियाणि दशैकं च मनसस्तन्मात्रका[5]स्तथा ।
पञ्चैवं षोडशकलं लिङ्गदेहमनादिमत्[6]
ते[7] जीवा बाह्यत[8]स्त्रिविधाः । [-सात्त्विका राजसास्तामसाश्चेति ।

[सात्त्विकेषु त्रैविध्यम्]

तत्र सात्त्विकास्त्रिविधाः][9] सात्त्विकतामसा ऋष्यादयः । सात्त्विकराजसा अतात्त्विकदेवताः । सात्त्विकसात्त्विका अग्न्यादितात्त्विकदेवाः[10] ।

---

1. श्वेतरूपाश्च - अ
2. यथा - अ
3. संछिन्ना - अ
4. स्ता क्षाचवर्षैः - प्रा-1, प्रा-2
5. मातृका - अ
6. मनादिभिः - प्रा-1, प्रा-2
7. सर्वे - अ
8. 'बाह्यत' नास्ति - प्रा-1, प्रा-2
9. आवरणान्तर्गतो भागः नास्ति - अ
10. सात्त्विकसात्त्विकास्तत्त्वाभिमानिनो देवाः तात्त्विका इत्युच्यन्ते । - प्रा-1

[सात्त्विकसात्त्विका अपि त्रिविधाः -

सात्त्विकसात्त्विकसात्त्विकतामसा रुद्रादयः ।

सात्त्विकसात्त्विकसात्त्विकराजसी ब्रह्माणी ।

सात्त्विकसात्त्विकसात्त्विकसात्त्विकश्चतुर्मुखः ।][1]

सात्त्विकसात्त्विकतामसा इन्द्रियव्यतिरिक्ततात्त्विकाः[2] । सात्त्विकसात्त्विकराजस[3] इन्द्रः ।

सात्त्विकसात्त्विकसात्त्विकाः सौपर्ण्यादयः[4] ।

[राजसत्रैविध्यम्]

राजसा अपि त्रिविधाः । राजसतामसा अज्ञाः [मनुष्यमध्यमाः]] । राजसराजसाः मनुष्यमध्यमाः स्वर्गभूप्रचुराः[5] । राजससात्त्विका मनुष्योत्तमाः ।

राजससात्त्विका अपि चतुर्विधाः । राजससात्त्विकेषु सात्त्विका ब्राह्मणाः । राजससात्त्विकेषु स्वल्परजसः क्षत्रियाः । राजससात्त्विकेषु

---

1. आवरणन्तर्गतो भागः 'सौपर्ण्यादयः' इत्यतः अनन्तरम् अस्ति - अ । 'सत्त्विक...सात्त्विक' इत्यत्र सात्त्विकसात्त्विकसात्त्विकसात्त्विक इति वर्तते । - अ
2. सात्त्विकसात्त्विकतामसादिव्यतिरिक्ताः सात्त्विकाः । - प्रा-1
3. सात्त्विकराजस - अ
4. सौपर्णादयः । - प्रा-1, प्रा-2
5. राजसतामसा नित्या त्रैविध्याः - अ
6. राजससात्त्विकाधिकाः - अ

समसत्त्वरजसः वैश्याः । राजस[1]सात्त्विकेषु अधिकतमसः शूद्राः[2] । राजस-सात्त्विकेषु सात्त्विकाः परमहंसाः । [परमहंसाधिकरजसः हंसाः ।][3]

[हंसाधिकरजसः बहूदाः, बहूदादधिकरजसः कुटीचकाः, कुटीचकाद-धिकरजसः वनस्थाः, वनस्थादधिकरजसः ब्रह्मचारिणः, ब्रह्मचर्यादधिक-रजसः गृहस्थाः। शिखायज्ञोपवीतहीना एकदण्डिनः परमहंसाः । यज्ञोप-वीतवानेकदण्डी हंसः।][4]

[तामसत्रैविध्यम्]

तामसा अपि त्रिविधाः - [तामसतामसाः प्रधानदैत्याः ।][5] तामस-राजसाः प्रधानदैत्यभृत्याः ।

तामससात्त्विकाः मनुष्याधमाः[6] इत्येतत्[7] सर्वं गीताभाष्यटीकाप्रमेय-दीपिकातोऽ[8]वगन्तव्यम् ।

---

1. राज - अ
2. रजोऽधिकतमसः - अ
3. आवरणान्तर्गतो भागः नास्ति - अ
4. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
5. आवरणान्तर्गतो भागः नास्ति - अ
6. मनुष्याधर्माः । - प्रा-1, प्रा-2
7. एतत् - प्रा-1, प्रा-2
8. दीपिकाद - प्रा-1, प्रा-2

[भौतिकदेहसृष्टिः]

'एतादृशसंसारित्रिविधजीवान्'[1] दृष्ट्वा श्रीनारायणः[2] प्रभाते त मध्ये प्राणं निबोधयामास, '.

ब्रह्मणः स्वापो नाम उन्निद्रितनेतृत्वम्[3] । 'प्रलयेऽपि प्रतिभातपराव इत्युक्तेः ।

'उद्बोधितस्ततः प्राणः प्रणिपत्योपतस्थिवान् ।
तमवोचत्[4] ततः प्राणमस्मिन्[5] कल्पे त्वया सह ।
मोक्षमाणांस्तु[6] तान् जीवान् पृथक् कुरु महामते! ।
एवं मदाज्ञया प्राणो[7] जीवान् सर्वांश्च तादृशान् ।
उद्बोधयित्वा पुरतः स्थापयामास सर्ववित् ।
ततः तत्त्वाभिमानिन्यः तत्र[8] रुद्रपुरःसराः ।
देवताः शक्रसूर्याद्या[9]स्ताः सर्वाः प्रत्यबोधयत्[10] ।

---

1. सुपुप्तिसंस्थाने तादृशजी[वा]न् - अ
2. नारायणः - प्रा-1, प्रा-2
3. निद्रामुद्रितनेत्रत्वम् - अ
4. चं - प्रा-1, प्रा-2
5. यस्मिन् - प्रा-1, प्रा-2
6. मोक्षमाणस्तु - प्रा-1, प्रा-2
7. प्रणव - प्रा-1, प्रा-2
8. सूत्र - प्रा-1, प्रा-2
9. द्य - प्रा-1, प्रा-2
10. प्रतिवोधय - प्रा-1, प्रा-2

इत्युक्तः स मया प्राणः तानप्यादाय तस्थिवान् ।
ततो मदाज्ञया प्राणो मनसीन्द्रं न्य[1]योजयत् ।
श्रोत्रे दिग्देवता वायुं त्वचि सूर्यं विलोचने ।
रसे तु वरुणं घ्राणे दस्रौ पाणिं धनञ्जयम्[2] ।
पाणौ दक्षं जयन्तं च पादे शिष्टं तथा मनुम्[3] ।
पायौ मित्रं ततस्तासां बुभुक्षा चाभवद् भृशम्[4] ।
ततः संपीड्यमानास्तु तदा मां शरणं ययुः ।
स्थानं प्रदिश यत्रस्था विषयान् भुञ्ज्महे[5] वयम् ।
तृणगुल्मलतावृक्षान् ग्राम्यारण्यपशूनपि ।
क्रमेण दर्शयंश्चासु[6] स्थितास्तृप्तिं न भेजिरे ।
ततोऽश्वं[7] दर्शयामास नास्मिन् प्रीता बभूविरे ।
ततो गां दर्शयामास तत्राप्यासुरतृप्तयः ।
महत्तत्त्वेन[8] कृतवान् पूर्वं यां पुरुषाकृतिम् ।

---

1. नि-प्रा-1 प्रा-2
2. दस्रावग्निं च वाचि तु - अ
3 पादौ शिश्ने मनुं तथा - अ
4. चाभव ऋषा - अ
5. विपयानुझहे - अ
6. दशयंतासु - अ
7. ऽश्व - अ
8. महत.वेन - अ

तामदर्शयमेतान् यो वरमित्यब्रुवंस्तदा[1] ।
ततः प्राणं तु देहेऽस्मिन् निवेश्येन्द्रियदेवताः[2] ।
सर्वान् जीवगणांश्चापि सर्वान् देवगणानपि[3] ।
न्यवेशयंल्लीलयैव[4] सर्वदाऽनन्दविग्रहः इति ।

- इति विष्णुरहस्ये ।

एवं नारायणः[5] इन्द्रियदेवान् सर्वजीवांश्च[6] महत्तत्त्वे निधाय तन्महत्तत्त्वं शतधा[7] विभजयामास ।

[विलिङ्गानां प्राक्कालीयसाधनसम्पन्नजीवानां स्वोदरस्थानां वासुदेवेन मुक्तिदानम्]

ततो[8] वासुदेवः स्वोदरस्थजीवानां[9] मुक्तिं ददौ ।

तदुक्तम् पञ्चरात्रे[10] -

[वासुदेवो ददौ मुक्तिं सायुज्याख्यां तु ब्रह्मणाः(णः)।]

---

1. तामदर्शयदेताभ्यो वरमित्यब्रुवंस्तुताः । - प्रा-1, प्रा-2
2. देवता - अ
3. देवानपि स्म ह - अ
4. न्यपेवयल्लीलयैव - प्रा-1, प्रा-2
5. नारायण एव - प्रा-1, प्रा-2
6. सर्वदेवांश्च - अ
7. 'शतधा' - नास्ति - अ
8. तदा - अ
9. सोदरजीवानां - प्रा-1, प्रा-2
10. 'पञ्चरात्रे' - नास्ति - प्रा-1, प्रा-2

दत्तौ तदनु सायुज्यं तत्त्वाह्वानं महात्मनाम्।

सारूप्यं चैव केषाञ्चित् सामीप्यं च ततो विभुः ।

सालोक्यं च यथान्यायं ददौ देवो जनार्दनः ।][1]

तत्र साधनसंपन्नान्विलिङ्गानपरोक्षिणः[2] ।

[वासुदेवः स्वोदरगान् बहिर्निःसृत्य तान् विभुः ।

श्वेतद्वीपं शिंशुमारं दृष्ट्वा स्वेच्छाविहारिणः ।][3]

सन्तो गच्छन्त्विति[4] प्राज्ञान् यदा चाज्ञापयद् हरिः ।

तदा मुक्ताश्चेति[5] प्रोक्ताः 'पुरा ज्ञानविहीनतः ।। इति ।'[6]

एवं मुक्तिं दत्वा वासुदेवः त्रिंशद्भागपरिमितं तथा पञ्चविंशतिभि-र्महत्त[7]त्त्वम्[8]अग्रसत् । सङ्कर्षणः अष्टाविंशतिभागपरिमितं प्रद्युम्नः अव[9]शिष्ट-तत्त्व[10]मग्रसत् ।

1. आवरणान्तर्गतो भागः 'पुरा ज्ञानविहीनतः' इत्येतदनन्तरं वर्तते - अ
2. न्विलिङ्गाना परोक्षिणः -
3. आवरणान्तर्गतो भागः नास्ति - अ
4. गच्छन्निति - प्रा-1, प्रा-2 ; सतो गंच्छत्विति - अ
5. मुक्ता इति - अ
6. न पुरा ज्ञा विहिनतः - अ
7. त - चेन्नै
8. 'पञ्चविंशतिभि' - नास्ति - प्रा-1, प्रा-2
9. वि - प्रा-1, प्रा-2
10. 'तत्त्व' - नास्ति - प्रा-1, प्रा-2

उक्तं च -

'महत्तत्त्वविभागोऽर्धः शतधा स विभाजितः[1] ।
पुरुषस्त्रिंशतिभिर्भागैः[2] पञ्चविंशतिभिस्तथा[3] ।
प्रकृत्या निर्मितं[4] सूत्रम् अष्टाविंशतिभागकैः ।
वाग्देवी सप्तदशभिर्भागैः[5] सृष्टाऽभवत्पुरा[6] ।'

[व्यूहसृष्टिः]

तथा अन्यत्र -

एवं पुरुषदेहं तु वासुदेवोऽगिलत् ततः[7] ।
मायायां जनयामास विरिञ्चं परमाद्भुतम् ।
स्वसहायं च पुरुषं[8] वाञ्छमानोऽथ[9] मां प्रति ।
उक्तवान् देहि मे स्वामिन् सहायं कल्पयेति[10] वै ।
ततः सङ्कर्षणाज्जज्ञे महत्तत्त्वस्य भागतः ।

---

1. सर्वभाजतः - प्रा-1, प्रा-2
2. स्त्रिंशद्भागैः - प्रा-1
3. तिस्ततः - प्रा-1, प्रा-2
4. प्रकृतिर्निर्मितं - प्रा-1, प्रा-2 अ
5. सप्तदशादिभिः भागे - प्रा-1, प्रा-2
6. सृष्टा भव सुरैरिति - प्रा-1, भवपुरेति - अ
7. ग्रतस्ततः । - प्रा-1, प्रा 2
8. स्वसाहाय्यं द्वितीयं चे - अ
9. ऽपि - अ
10. साहाय्यं कृपयेति - अ

सूत्रनामा जीवगणैः युक्तः[1] प्राणो जयात्मजः ।
स तु वर्षद्वयादूर्ध्वं जजान ब्रह्मजन्मनः[2] ।
प्रद्युम्नो जनयामास[3] कृतौ कन्याद्वयं तदा[4] ।
जज्ञाते प्रकृतिश्रद्धे[5] वायोर्वर्षत्रयात्[6] परम् ।
[तत्राद्यां योजयामास विरिञ्चेन विपश्चिता ।
सूत्रेण तु द्वितीयां च क्रीडन्तौ तस्थतुश्चिरम् ।][7]
ताभ्यामिति शेषः ।

[हयग्रीवेण ब्रह्मण उपदेशः]

एकदाचिन्तयद्विष्णुं स ब्रह्मा चिन्तया चिरम् ।
कथं सर्वज्ञतां यामि सृष्टौ शक्तिः कथं भवेत् ।
कथं मोक्षमवाप्स्यामि मुक्तः संसारसागरात् ।
ततो हयास्यरूपेण प्रादुर्भूतः स्वयं हरिः ।
तं दृष्ट्वा प्राणनामाऽसौ विरिञ्चः प्रेमविह्वलः ।
ततः[8] प्राणोऽपि तत्पत्न्यौ सर्वे नेमुः पुनः पुनः ।

---

1. युक्तौ - प्रा-1, प्रा-2
2. जजान व्रजन् मनः - प्रा-1 ; जनानब्जजजन् मनः - प्रा-2
3. 'स'-इत्येतदक्षरं लुप्तम् - अ
4. तथा - अ
5. द्धा - प्रा-1
6. द्वयात् - अ
7. आवरणान्तर्गतो भागः नास्ति - अ
8. यतः - प्रा-1

ब्रह्माणमुपवेक्ष्यान्ते[1] पृष्ठतोऽन्यान्[2] निवेश्य च ।
वेदांश्चैवोपवेदांश्च सर्वानध्यापयत् क्रमात् ।
देहेऽहं[3] भाविनोऽन्यत्र ममताबुद्धयः सदा ।

[हरेर्माया हि बन्धिका]

अनिच्छन्तोऽपि[4] भुञ्जन्ति दुःखानि विविधान्यपि ।
सुखानि प्रार्थ्यमानानि नाप्नुवन्ति निजेच्छया ।
प्रतिक्षणं[5] प्रपश्यन्ति सर्वेऽप्येवं परात्मताम् ।
स्वातन्त्र्यं मन्यतेऽथापि मायया मम मोहिताः[6] ।
विदित्वाऽपि न जानाति पश्यन्नपि न पश्यति[7] ।
न शृणोति तथा शृण्वन् शिक्षमाणो न शिक्षते[8] ।
[एतन्मायाबलं विष्णोः सा माया परमात्मनः ।
बोधयन्तः परान् ये तु स्वयं मुग्धा भवन्त्युत ।][9]

---

1. ब्रह्माणमुवविश्याग्रे - अ
2. ऽन्या - प्रा-1
3. देहाहं - अ
4. अनिच्छतोऽपि - प्रा-1, प्रा-2
5. प्रतिक्रियं - प्रा-1
6. मम मायाविमोहिताः - अ
7. न पश्यन्नपि - अ
8. शिक्ष्यते - अ
9. आवरणान्तर्गतो भागः नास्ति - अ

यत्तन्मायाबलं विष्णोर्महाशक्तेः परात्मनः[1] ।
परेषां रोगहर्तार[ः] स्वरोगं न विजानते[2] ।

[एतन्मायावलं विष्णोः]

सा परेषां हानिलाभादेः वेत्तारः स्वं न जानते।

[एतन्मायाबलम्]

एकरोगेषु देहेषु एकमेव हि चौषधम् ।
करोति फलभेदं या[3] सा माया परमा मम ।
गोमयादिषु जायन्ते नानाजीवाः सहस्रशः ।
विना मातापितृभ्यां यत्[4] सा माया [परमा मम][5]
गवादिभक्षितं वस्तु क्षीरं[6] रक्तादिभेदतः ।
भजन्ते परिणामं यत् सा माया परमा मम[7]
[ऋतुस्नातायां तु भार्यायां रेतस्सेके[8]कृतेऽपि हि ।

1. सर्वं तस्य विष्णोर्महात्मनः - अ
2. विराजते - अ ; परेषां हानिलाभादिवे.ारः स्व न जानते - प्रा-2
3. यः - प्रा-1, प्रा-2 ; यत् - अ
4. य - अ
5. 'परमा मम' - नास्ति - प्रा-1, प्रा-2
6. क्षीर - अ
7. 'परमा मम' - नास्ति - प्रा-1, प्रा-2, अ
8. श्शेके - अ

नैवोत्पत्तिर्हि गर्भस्य सा माया परमा मम ['माया परमा मम'-नास्ति अ][1]

देहस्थानविशेषेषु नखरोमादिकं[2] च यत् ।
जायते स्वेच्छया नैव सा माया परमा मम[3] ।
वृक्षादिपत्रपुष्पादौ चित्राकारो हि जायते ।
विचित्रगन्ध[4]पुष्पादि सा माया परमा मम[5] ।
काष्ठभारो महानेषः स्वयं तरति तारयेत् ।
मज्ञयेच्च शिलाखण्डः सा माया परमा मम[6]
[रजस्वलायां गर्भार्यै[7] रेतःसेके कृते सति ।
गर्भोत्पत्तिर्नैव दृष्टः सा माया परमा मम ।][8]
शुक्लशोणितसम्बन्धात् स्त्रीपुंक्लीबादिभेदतः ।
जायते गर्भनिष्पत्तिः सा माया परमात्मनः ।
लाखण्डः सा माया परमा मम ।

---

1. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
2. लोमादिकं - अ
3. 'माया परमात्मनः - नास्ति - अ ; प्रकरणत्वात् ममेति साधु ।
4. वर्ण - अ
5. 'माया परमात्मनः - नास्ति - अ ; अयं श्लोकः 'शुक्लशोणितसंबन्ध'-इत्यादिश्लोकानन्तरं विद्यते । - अ
6. 'माया परमात्मनः - नास्ति - अ ; 'शिलाखण्डः सा माया परमात्मनः'-नास्ति - प्रा-1, प्रा-2
7. प्रा-1?
8. आवरणान्तर्गतो भागः नास्ति - अ

[आनन्दोद्रेकात्सृष्टिः]

ब्रह्मोवाच -

पूर्णानन्दोऽपि भगवान् किमर्थं सृष्टिमातनोत् ।
प्राप्तवान् किमु सृष्ट्या स कथं पूर्णस्तथासति ।।[1]

हयग्रीव उवाच[2] -

यथाऽऽनन्दस्तथा क्रीडा यथाऽऽनन्दस्तथोद्यमः ।
महानन्दस्य महती महा[3] क्रीडेयमीरिता ।
इयं हि सकला सृष्टिः तस्यानन्दस्य लेशतः ।
अनन्तानन्दपूर्णस्य[4] ह्यनुरूपा[ऽवृथा][5] भवेत् ।
[श्रवणं मननं ध्यानं कुर्वन् साक्षात्कृति [लभेत्][6] ।
यस्तस्मै मोक्षदाताऽहं यो द्वेष्टि सततं हि माम् ।
तमोऽन्धे पातयिष्यामि निवृत्तिर्न यतो भवेत्।
सत्यसंकल्पतस्तस्मात् अन्यथा न करोत्ययम् ।
अन्यः कोऽपि न चास्त्येव तत्संकल्पविरोधकृत् ।][7]

---

1. ऽयं कथं पूर्णस्त्वया सति । - प्रा-1, प्रा-2
2. श्री हयग्रीवः - प्रा-1, प्रा-2
3. तथा - प्रा-1
4. अनन्तानन्दस्य पूर्णस्य - प्रा-1, प्रा-2
5. कथं - प्रा-1
6. याम् - प्रा-1
7. आवरणान्तर्गतो भागः नास्ति - अ

[बाह्याभ्यन्तरदीक्षा आवश्यकी]

दीक्षा हि द्विविधा प्रोक्ता बाह्यान्तरविभेदतः[1] ।
'अयं[2] सर्वेष्टदाता मे सर्वानिष्टनिवारकः[3] ।
सर्वोत्कृष्टोऽयमेवैकः तदीयो[4]ऽहं स मे पतिः ।'
इति ज्ञानं निश्चितं यत् सा दीक्षाऽभ्यन्तरा मता ।
[नामचिह्नादिना देहे वह्निना वा मदङ्कनम् ।
स बाह्या[5] प्रोच्यते दीक्षा ह्यज्ञानां ज्ञानिनानपि ।][6]
सदाचाररतोऽपि स्याद् विष्णुदीक्षाविवर्जितः ।[7]
स चोरवत् बहिष्कार्यस्त[8] स्मै दत्तं च[9] निष्फलम् ।
तस्मात्तु वैष्णवी दीक्षा निखिलैर्ब्राह्मणादिभिः[10]
मनसा कर्मणा वाचा ग्रहणीया[11] प्रयत्नतः ।

---

1. बाह्याभ्यन्तरभेदतः - अ
2. आर्यः - अ
3. सर्वारिष्टनिवारकः - अ
4. य्यो - प्रा-1
5. ह्यां - अ
6. आवरणान्तर्गतो भागः - नास्ति - प्रा-1, प्रा-2
7. सदाऽश्वोरंचार - प्रा-2 ; वन्तोऽपि स्याद्विष्णुदीक्षाविवर्जितः । - प्रा-1, प्रा-
8. त - प्रा-1, प्रा-2
9. तु - अ
10. र्ब्रह्मवादिभिः । - प्रा-1, प्रा-2
11. याः - प्रा-1, प्रा-2

इति ते सर्वमाख्यातं भवचिन्तापनुत्तये ।
यत् किञ्चिदन्य[त्] श्रोतव्यं तदप्यत्रैव पश्य भो[ः][1]
ब्रह्मप्राणौ सपत्नीकौ भक्त्या तं[2] नेमतुस्तदा ।
[कृतकृत्यत्वमात्मानं मत्वा विधिरुवाच ह][3]
कृतकृत्योऽस्मि धन्योऽस्मि[4] श्रुत्वा त्वद्गीतमुत्तमम्[5] ।
अज्ञानतमसोनाशाद्[6] विज्ञानार्कोऽधुनोदितः।
इति ब्रुवाणे वाणीशे[7] हयग्रीवस्तिरोदधे ।
य इदं परमं गुह्यं विष्णूक्तं श्रुणुयान्नरः ।
पठेद्वा[8] श्रावयेद् वाऽपि ज्ञानयज्ञफलं लभेत् ।'

इत्थं हयग्रीवोपदेशानन्तरं गरुडशेषावुत्पन्नौ ।

'प्रकृत्यां पुरुषाज्जीवः [गरुडो वायुजो मतः ।
सर्पाकारोऽभवज्जीवः][9] कालोऽभूत् पक्षिरूपधृक् ।
प्रकृतेर्जन्मतो वर्षद्वयादेनौ[10] बभूवतुः ।

---

1. पश्यतु - प्रा-1, प्रा-2
2. ते - प्रा-1, प्रा-2
3. आवरणचिह्नान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
4. धन्योऽहं कृतकृत्योऽहं - अ
5. त्वद्गीतमद्भुतम् - अ
6. माद् - प्रा-1, प्रा-2
7. तस्मिन् सः - अ
8. दा - प्रा-1, प्रा-2
9. आवरणान्तर्गतो भागः नास्ति - अ
10. वेतौ - प्रा-1, प्रा-2

तत्र शेषात् कालनामकादेव जाताः । गरुडात्तु[1] जयविजयाद्य
विष्णुपार्षदा जाताः । अथ विधिसूत्रे[2] पार्थिवौदक[3]तेजोभिः महत्तत्त्वादि
देहान् वर्धयामासुः । अथ पुनर्विरिञ्च[4] सूत्रयोः सृष्टिरभूत् ।
उक्तं च[5] तात्पर्यनिर्णये -

'पुंसः प्रकृत्यां[6] च पुनर्विरिञ्चा -
च्छिवोऽथ तस्मादखिलाः सुरेशाः ।
जाताः सशक्राः पुनरेव सूत्रा -
च्छ्रद्धा[7]सुतानाप[8] सुर[9]प्रवीरान् ।।
शेषं शिवं चेन्द्रमथेन्द्रतश्च
सर्वे सुरा यज्ञगणाश्च जाताः' । इति[10] । (म.ता.नि.)
'ब्रह्मणो दशवर्षे तु सृष्टिरेवमजायत' । इति विष्णुरहस्ये[11] ।
वासुदेवसंकर्षणयोः सकाशात् सूक्ष्मतरसृष्टिः ।

---

1. 'तु' - नास्ति - प्रा-1, प्रा-2
2. सूत्रौ - प्रा-1, प्रा-2
3. पार्थिवोदक - प्रा-1, प्रा-2
4. ञ्चि - अ
5. 'च' - नास्ति - प्रा-1, प्रा-2
6. त्या - अ
7. शुद्धा - अ
8. सुतानोव - प्रा-1, प्रा-2
9. सुत - प्रा-1, प्रा-2
10. 'इति' - नास्ति - प्रा-1, प्रा-2
11. एवं - अ

[प्रद्युम्नकृता सूक्ष्मसृष्टिः]

अथ प्रद्युम्नात् सूक्ष्मसृष्टिरुच्यते -

तत एकादशे वर्षे प्रारब्धे ब्रह्मणो हरिः[1] ।
प्रगृह्य सर्वदेवांशान् जीवांशानखिलानपि ।
प्रद्युम्नरूपः स्वाङ्गेषु बीजत्वेनासृजत्ततः ।
तस्य वामाङ्गमभवत् कृती देवी ततस्त्वयम् ।
अर्धनारीकदेहोऽसावर्धनारायणोऽभवत् ।
तस्य दक्षिणभागेभ्यः पुरुषा जज्ञिरेऽखिलाः ।
चातुर्वर्ण्य[2] विभेदेन नार्यो वामाङ्गतोऽभवन् ।
मुखं[3] दक्षिणभागेभ्यो ब्रह्माग्नी वरुणादयः ।
ऋषयोऽपि मरीच्याद्याः[4] ये च विप्राः स्वरूपतः ।
देवा[5]स्तेऽपि विनिर्जग्मुः ते विप्रा मुखजन्मनः ।
ब्रह्मा[6] ब्राह्मणवर्णस्य मुख्यो देवः[7] प्रकीर्तितः ।

---

1. हरेः - अ
2. चतुर्वर्ण - प्रा-1, प्रा-2
3. मुख - प्रा-1, प्रा-2
4. मरीच्याद्याश्च ऋषयो - अ
5. जीवा - प्रा-1, प्रा-2
6. ब्रह्मो - प्रा-1, प्रा-2
7. जीवः - प्रा-1, प्रा-2

ब्रह्मादीनां तु याः पत्न्यः स्त्री[1] जीवाः ब्रह्मजातयः ।
ता जाताः वामभागेभ्यो मुखस्यार्धस्वरूपिणः ।
भुजाद्दक्षिणतो वायुरुद्रशेषगरुत्मतः ।
इन्द्रप्रद्युम्नचन्द्रार्कवसुरुद्रादयोऽपरे ।
मरुतः क्षत्र[2] वर्णत्वाज्जज्ञिरे क्षत्रवर्णकाः[3] ।
सर्वेऽथ[4] तच्छ्रियो वामात् भुजाद् विष्णोर्विनिर्गताः।
क्षत्रदेवः परो वायुः प्रायेण क्षत्रियाः सुराः ।
कुबेरो[4] देवगन्धर्वाः दस्राद्या वैश्यवर्णकाः ।
वैश्यजीवाः परे विष्णोरूरो[6]र्दक्षिणतोऽभवन्[7] ।
नार्यश्च तादृशा वामा ऊर्वोर्जाताः प्रजापतेः ।
कुबेरो[8] वैश्यवर्णस्य देवता परमोच्यते[9] ।
यमो मनुष्यगन्धर्वाः तथैवाजानदेवताः ।

---

1. श्री - प्रा-1, प्रा-2
2. क्षत्रं - अ
3. जीविकाः - अ
4. 'ऽथ'- नास्ति - प्रा-1, प्रा-2
5. र - प्रा-1, प्रा-2
6. रूर्वा - प्रा-1, प्रा-2
7. भवान् - प्रा-1, प्रा-2
8. कुबेरे - अ
9. ये - अ

शनिपुष्करयक्षा[1]द्याः[2] यमदू[3]ताश्च सर्वशः ।
चित्रश्च चित्रगुप्तश्च बन्दिवेतालकिन्नराः ।
विद्याधरादयो[4] येऽन्ये शूद्रवर्णाः समस्तशः ।
शूद्रवर्णास्ततः[5] सर्वे जातास्तद्दक्षिणाङ्घ्रितः[6]
स्त्रियस्तादृशरूपास्तु तथैवाप्सरसां गणाः ।
जज्ञिरे वामतः पादाद्यमः शूद्रादिदेवता ।
यमस्यान्यद्धि यद् रूपं धर्मस्स ब्राह्मणः स्मृतः ।
पितरो ब्राह्मणा एव क्षत्रिया मनवस्स्मृताः ।
कर्मदिवस्तथाऽन्ये वै[7] निखिलाश्चक्रवर्तिनः ।
क्षत्रिया एव[8] ते प्रोक्ता राक्षसा अपि शौर्यतः ।
क्षत्रियेष्वेवगण्यन्ते[9] ततस्ते भुजतोऽभवन् ।
पशुतिर्यक्पक्षिवृक्षतृणगुल्मादयोऽखिलाः ।

---

1. था - अ
2. द्यामौ - अ
3. हू - अ
4. विद्याधरधरा - अ
5. तथा - अ
6. जातस्तद्दक्षिणां प्रतिः - प्रा-1, प्रा-2
7. 'वै'नास्ति - अ
8. अपि - अ
9. क्षत्रियेप्ववगण्यन्ते - प्रा-1, प्रा-2

जीवाः पुंस्त्रीविभेदेन रोमभ्यो निःसृता इमे ।
ब्रह्मविंशतिवर्षेषु[1] सृष्टिर्जाता निरूपिता[2] ।
एवं नानाविधैर्जीवैः नानारूपधरैर्हरिः ।
चिक्रीड[3] स्वेच्छया काले स्वा[4]नन्दपरिपूरितः ।।

- इति प्रद्युम्न[5]सूक्ष्मसृष्टिः

[अनिरुद्धकृता सृष्टिः]

अथ प्रद्युम्नः । मनुष्यमानेन शरदां सहस्रं स्थित्वा स्वमूर्तिभिः[6] क्री- कृत्वा ततः स्वोत्पादितजीवराशिं[7] बीजरूपत्वेन अनिरुद्धाय ददौ ।

पुरुषस्यैकविंशेऽब्दे[8] प्रारब्धेऽसौ निरुद्धकः[9]
जातान् प्रद्युम्नतः[10] सर्वान् जीवानादाय लीलया ।
निधाय सोदरे पश्चाच्छान्त्यामाधत्त सर्वश इति[11] ।

---

1. वर्षपु - अ
2. सृष्टानांता - प्रा-1
3. चिक्रीडे - प्रा-1, प्रा-2
4. ह्या - प्रा-1, प्रा-2
5. म्ना - प्रा-1, प्रा-2
6. सहस्रस्वं मूर्तिभिः - प्रा-1
7. सोऽत्पादिनां जीवराशिं - प्रा-1, प्रा-2
8. पुष्यस्यैकविंशे द्वे - प्रा-1, प्रा-2
9. निरर्थकः - प्रा-1, प्रा-2
10. प्रद्युम्नस्ततः - प्रा-1 प्रा-2
11. 'इति '- नास्ति - अ

[तथा][1]'ततो महत्तत्त्वतनुर्विरिञ्चः
स्थूलात्मनैवाजनि वाक् च देवी ।
तस्यामहङ्कारतनुं स रुद्रं[2]
ससर्ज बुद्धिं च तदर्धदेहाम्[3] ।
बुद्ध्यामुमायां स शिवस्त्रिरूपो[4]
मनश्च वैकारिकदेवसङ्घान् ।
दशे[5]न्द्रियाण्येव च तैजसानि
क्रमेण खादीन्[6] विषयैश्च सार्धम्'[7] । इति[8] । (म.ता.नि.)

ततः शिवः उमया सह[9] अर्धनारीवेषं धृत्वा ब्रह्मण एकवर्षपरिम्मितं[10] कालम्[11] अनिरुद्धाय तपश्चक्रे । ततोऽनिरुद्धः प्रीतः सन् सर्वेषां जनको भवेति[12] वरं ददौ । ततो[13]ऽनिरुद्धः शिवं प्रविश्याखिलं सृष्टवान् ।

1. आवरणान्तर्गतो भागः अधिकः - प्रा-1, प्रा-2
2. रुद्रो - अ
3. देहम् - अ
4. शिवः स्त्रीरूपो - अ
5. देहे - प्रा-1, प्रा-2
6. स्वादीन् - प्रा-1, प्रा-2
7. विषयांश्च सार्धम् - अ
8. 'इति'- नास्ति - प्रा-1, प्रा-2
9. 'उमया सह'- नास्ति - प्रा-1, प्रा-2
10. पर्यन्तं - अ
11. 'कालं ' - नास्ति - प्रा-1, प्रा-2
12. जनित्या भवेहि - प्रा-1 ; जनिता भवेदिति - प्रा-2
13. अन्ततो - अ

शिवान्तर्गतानिरुद्धा एकादश रुद्रा जाताः[1] । द्वादशादित्याः दश विश्वे देवा जाताः[2] अष्टौ वसवः पञ्चाशन्मरुतः नासत्यदस्रौ[3] ऋभवः जाताः ।

द्यावाभूमी गुरुश्चैते[4] सोमपा निखिला अपि ।
कुबेरो विघ्नपः कामो निर्ऋतिश्चन्द्रमा यमः[5] ।
गन्धर्वा ऋषयो यक्षाः सिद्धाद्या[6] निखिला अपि ।
जज्ञिरे क्रमश[7]स्तस्मादर्धनारीनरेश्वरात् ।
[कर्णाभ्यां जज्ञिरे तस्य वासुक्याद्यखिलोरगाः ।
तेषु श्रेष्ठतरा ये तु ह्येतद्भूषणतां गताः ।
सर्वे जीवाः समुत्पन्नाः वामदक्षिणभागतः ।
एवं सृष्ट्वा स भूतानि मुमुदे बहुवत्सरम् ।][8]

इति अनिरुद्ध[9]स्थूलसृष्टिः ।

---

1. 'जाताः' - नास्ति - अ
2. 'जाताः' - नास्ति - प्रा-1, प्रा-2
3. अश्विनौ - अ
4. गुरुश्चैव - अ
5. यतः - प्रा-1, प्रा-2
6. सिद्धाद्यो - प्रा-1, प्रा-2
7. त - अ
8. आवरणान्तर्गते भागे अप्रतौ सर्वथा व्यत्यस्तः पाठोऽस्ति । यथा-
   सर्वाङ्गेभ्योऽथ रोमभ्यो सृष्ट्वैव स महेश्वरः ।
   वामदक्षिणभागेभ्यो मुमुदे बहुवत्सरम् ।
   दश पञ्च च वर्षाणि सा सृष्टिरभवत् पुरा ।
9. द्धा - प्रा-1, प्रा-2

अ[1]थाऽऽवरणसृष्टिः

ब्रह्मणः षड्विंशे वर्षे[2] प्रारब्धे[3] ते देवाः भगवन्तमाश्रयार्थमुपश्लोकयांबभूवुः । एते हि देवाः पुनरण्डसृष्टावशक्नुवन्तो हरिमेत्य तुष्टुवुः[4] –

'त्वं नो जगच्चित्रविचित्रसर्गनिःसीमशक्ते[5] कुरु सन्निकेतनम्'[6] । इति[7] श्रीमद्भागवतम् ।

अथ भगवान्[8] ब्रह्माण्डं स्रष्टुकाम आवरणानि चकार। सर्वस्मात्[9] बहिः अव्याकृताकाशः । तत्र व्याप्त[10]मूर्तिः । तस्मात् इतो वासुदेवः[11] आवरणरूपेण तिष्ठति । ततोऽपि इतः विरजा नदी । सा देवाङ्गस्वेदजनिता । लक्ष्मीस्तदभिमानिनी[12] स्त्रीः[13] । [14]इतः संकर्षणमूर्तिः । इतः

---

1. त - प्रा-1, प्रा-2
2. अत्रापि षड्त्रिंशे वर्षे प्रारब्धे इति भवितव्यम् । प्रमाणानुरोधात् । मातूक्ता पुरस्तात् विष्णुरहस्येति ज्ञेयम् ।
3. 'प्रारब्धे' - द्विः लिखितम् - अ ; 'प्रारब्धे' - नास्ति - प्रा-1, प्रा-2
4. तुष्टुवः - अ
5. निःश्रामशक्तिः - अ
6. सन्निकेतम् - प्रा-1, प्रा-2
7. 'इति' - नास्ति - प्रा-1, प्रा-2
8. 'भगवान्' - नास्ति - अ
9. 'भूगोलं सर्वस्मात्' - अ
10. स - प्रा-1, प्रा-2
11. इतः वासुदेवः - अ ; अन्तः वासुदेवः - प्रा-1, प्रा-2
12. 'लक्ष्मी' - नास्ति - प्रा-1, प्रा-2 ; नीः - प्रा-1
13. 'स्त्री' - नास्ति - अ
14. लक्ष्मीस्तदभिमानिनी - अ

प्रद्युम्नमूर्तिः । इतः अनिरुद्धमूर्तिः । तदनन्तरं मूलजड[1]प्रकृतिः । तत्र महालक्ष्मीः । इतः[2] सत्त्वगुणः । तत्र श्रीदेवी । इतो रजोगुणः । तत्र भूदेवी[3] । इतस्तमोगुणः । तत्र दुर्गादेवी अभिमानिनी[4] । प्रकृतेः परतः मुक्तब्रह्मा उपासकः । [अत्र अमुक्तब्रह्मा उपासकः।][5] इतो महत्तत्त्वम् । तत्र चतुर्मुखः । रुद्राद्यैरुपास्यः । इतः अ[6]हंकारतत्त्वावरणम् । तत्र रुद्रः इन्द्राद्यैरुपास्यः। इतो[7] बुद्धितत्त्वम् । तत्र पार्वती । इतो मनस्तत्त्वम् । तत्रेन्द्रकामौ । इतः आकाशावरणम् । तत्र गणपतिः । इतो वायुः । तत्र प्रवहः[8] । इतस्तेजः । तत्राग्निः । इत आपः । तत्र वरुणः । आदिकूर्मो वरुण उपास्यः । 'ततः पृथिवी । तत्र धरा । तत्र भूदेवीसहितो वराहः। ब्रह्माद्यैरुपास्य'[9] इति बहिरावरणम् ।

[असंसृष्टतत्त्वसृष्टिः]

एवं वासुदेवः ब्रह्मणो दश वर्षेषु असंसृष्टतत्त्वानि[10] क्रमाज्जनयामास । तदुक्तं तत्त्वसंख्याने-

---

1. 'जड' - नास्ति - अ
2. इति - अ
3. इतो रजोगुणस्तभूदेवी - अ
4. 'देवी अभिमानिनी' - नास्ति - अ
5. आवरणान्तर्गतो भागः नास्ति - अ
6. ततश्चा - प्रा-1, प्रा-2
7. इति - अ
8. प्रवाहः - प्रा-1, प्रा-2
9. तत्र मन्त्रः - अ
10. संसृष्टत.वानि - प्रा-1, प्रा-2

"असंसृष्टं महानहं बुद्धिर्मनः
[खानि दश मात्रा भूतानि पञ्च च ।
संसृष्टं तद्वं च समस्तं सं][1] प्रकीर्तितम् इति ।
तत्त्वैरुपचितैरेव[2] स्थूलैरावरणानि सः ।
विधाय सलिले तस्मिन् प्राविशन्[3] मायया सह ।
चिक्रीडेऽथ जले तत्र [भूभागे सलिलावृते ।
वासुदेवोऽखिलैर्जीवै][4] र्देवांशैर[5]खिलैर्वृतः ।
वर्षद्वये व्यतीतेऽथ सा माया त्रिविधाऽभवत् ।
सत्त्वादिगुणभेदेन श्रीभूदुर्गेतिनामिका[6] ।
वर्षमेकं तया सम्यगाराधितपदाम्बुजः ।
वासुदेवः स भगवांस्त्रिधा जज्ञे स्वयं ततः ।

[स्थूलसृष्टिः]

श्रियां विष्णुर्भुवि ब्रह्मा दुर्गायां[7] रुद्रनामकः ।
कर्तु[8] सृष्टिमतिस्थूलां तत्त्वसंसर्गमातनोत् ।

---

1. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
2. त.वैरुपगतैरेवं - अ
3. अविशन् - अ
4. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
5. वासुदेवोऽ - अ
6. नामका - अ
7. या - प्रा-1
8. कर्तु - अ

[स विष्णुः कमलानाथो लीलयैव तदा क्रमात् ।][1]
आकाशे योजयामास शतांशेन समीरणम् ।
तादृशाकाशतो वायौ शतांशं समयोजयत् ।
एवं हि तेजसो वायौ[2] वायु[3]स्तेजसि चार्पयत् ।
आपस्तेजसि[4] तोये च तेजसोंऽशमयोजयत्[5] ।
भुवा तोये[6] जलस्यापि शतांशं भू[7] व्ययोजयत्[8] ।
एवं पञ्चापि संसृज्य भूतानि स महेश्वरः ।
आप्यतैजसभौमानां पदार्थानां[9] च सृष्टये ।
त्रिवृतं त्रिवृतं चक्रे पृथ्वीसलिलतेजसाम्[10] ।
चत्वारः पृथिवीभागा[11] एकस्तैजस[12] एव हि ।

---

1. आवरणान्तर्गतो भागः नास्ति - अ
2. 'वायौ' - नास्ति - प्रा-1, प्रा-2
3. वायो - अ
4. अपां तेजसि - अ
5. तेजसा समयौजयत् - अ
6. भूयस्तोये - अ
7. भु - प्रा-2
8. समयोजयत् - अ
9. भूमानपरार्धानां - प्रा-1, प्रा-2
10. तेजसि - प्रा-1, प्रा-2
11. पृथ्वीभावा - प्रा-1, प्रा-2
12. तेजस - प्रा-1, प्रा-2

त्रयोंऽशाः सलिलस्यैवं[1] पार्थिवं राशिमातनोत् ।
[अपां भागस्तु चत्वारः पार्थिवांशास्त्रयस्तथा ।
एकस्तु तैजसो भागो राशिमाप्यं चकार सः ।][2]
चतुर्भिस्तैजसैर्भागैः त्रिभिस्तोयस्य भागकैः ।
भुव एकेन भागेन तेजोराशिं स[3] सृष्टवान् ।
भूतप्रेतादिदेहानां सृष्ट्यर्थमथ चातनोत् ।
पञ्चभिर्मारुतैर्भागैरप्तेजसभुवां त्रिकैः[4] ।
वायवीयं[5] पृथग्राशिमेवं राशिचतुष्टयम् ।
सृष्टवान् वासुदेवोऽसौ सर्वदाऽऽनन्दविग्रहः ।
[अप्शरीरस्य अब्भागः 4, पृथ्वीभागः 1, तजोभागः 1,
आकाशशरीरस्य आकाशभागः 5, अप् 1, तेजः 1, पृथ्वी 1,
....................आकाशभागो वर्तते । अल्पत्वादविवक्षा।][6]

[ब्रह्माण्डसृष्टिः]

ब्रह्माण्डं स्रष्टुकामोऽथ विष्णुर्लक्ष्मीमसेवत ।
त्रयो[7] विंशतितत्त्वानां गणं युगपदाविशत् ।

---

1. स्यैव - अ
2. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
3. व्य - प्रा-1, प्रा-2
4. त्रिभिः - प्रा-1, प्रा-2
5. वायव्यं च - अ
6. कुण्डलितो भागः नास्ति - प्रा-2 ; अ
7. तया - प्रा-1, तत्र यो - अ

अनन्तरं विष्णुः[1] तत्त्वैः सह रेतः रमायां विदधे । तद्रेतः तदुदरं प्रविश्य तदेवोदके निपपात । तदेव सौवर्णं समवृत्तकं ब्रह्माण्डं पार्थिवात् राशेरभवत् ।

ब्रह्माण्डान्तः पञ्चाशत्कोटिविस्तीर्णं भूमण्डलं वर्तते । भूमण्डलं[2] लक्षपरिमितं तद्विवरतया सप्तलोकाः । तदधस्तात् नरकलोकाः[3] ।

[भुव अधस्तनाः लोकाः]

तत्रादौ भूविवरतया अतललोकः । सः दशसहस्रोच्छ्रितः । तत्र मय[4] पुत्रोऽसुरो बलो वर्तते । तद् बिलं[5] द्विसहस्रम् । वितलः दशसहस्रोच्छ्रितः[6] । तत्र हाटकेश्वरनामकः हरः[7] पार्वत्या सह वर्तते[8] । तद् बिलं द्विसहस्रम् । सुतलश्चायुतोच्छ्रितः । तत्र बलिर्वामनं पूजयति । तद् बिलं[9] द्विसहस्रम् । तलातलः[10] अयुतोच्छ्रितः । तत्र मयो नाम दानवेन्द्र[11] आस्ते।

---

1. विष्णुं - अ
2. भूदलं - अ
3. नरकलोकः - अ
4. यम - प्रा-1, प्रा-2
5. दलं - अ, प्रा-2
6. अयुतोच्छ्रितः - अ
7. नामकहरः - प्रा-1, प्रा-2
8. सहास्ते - अ
9. दलं - अ, प्रा-2
10. सुतलः - अ
11. दानवेश्वरः - अ

तद् बिलं[1] द्विसहस्रम् । महातलः अयुतयोजनोच्छ्रितः[2] । तत्र क्रोधवशो नाम क्रोधवशनामकगण[3] आस्ते । तद् बिलं[4] द्विसहस्रम् । [रसातलः अयुतयोजनोच्छ्रितः । तत्र दानवा निवातकवचाः सन्ति । तद्बिलं द्विसहस्रम् ।

ततोऽधस्तात् रसातलः अयुतयोजनोच्छ्रितः ।][5] [तदधस्तात् पातालः अयुतोच्छ्रितः][6] तत्र वासुक्यादिना 'ना' नागपतयो[7] निवसन्ति । तद् बिलं[8] द्विसहस्रम् । सप्तलोकादधो नरकलोकः[9] ।

[अष्टाविंशति नरकाः]

तत्र[10] दक्षिणस्यां दिशि अष्टाविंशतिनरकयातनाभूमयः [प्रधानाः सन्ति।][11] 1. तामिस्रः, 2. अन्धतामिस्रः, 3. रौरवः, 4. महारौरवः[12]

---

1. दलं - प्रा-1
2. अयुतोच्छ्रितः - अ
3. दैत्यगण - प्रा-1
4. दलं - अ, प्रा-2
5. आवरणान्तर्गतो भागो नास्ति - अ
6. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
7. 'ना' - नास्ति - प्रा-1, प्रा-2
8. दलं - अ
9. रसातलः द्वादशसहस्रोच्छ्रितः - प्रा-1
10. तद् - अ
11. आवरणान्तर्गतो भागः नास्ति - अ
12. एप शब्दो लुप्तः - प्रा-1, प्रा-2

5. कुम्भीपाकः, 6. कालसूत्रः, 7. असिपत्रवनम्, 8. सूकरमुखः, 9. अन्धकूपः[1] 10. कृमिभोजनः, 11. संदंशः,[2] 12. तप्तसूर्मिः, 13. वज्रकण्टकः शाल्मली,[3] 14. वैतरणी,[4] 15. पूयोदः, 16. प्राणरोधनः,[5] 17. विशसनं, 18. लालाभक्षः, 19. सारमेयादनं, 20. अवीचिपूरः,[6] 21. रेतःपानं, 22. शारकर्दमः,[7] 23. रक्षोगणभोजनः,[8] 24. शूलप्रोतः, 25. दंदशूकः, 26. अवटनिरोधः, 27.पर्यावर्तनः,[9] 28. सूचीमुखः[10] - इत्यष्टाविंशतिः[11] ।

तत्र[12] पितृराजो वैवस्वतो यमः स्वपुरुषैः प्राणिनः पापानुसारेण ईश्वराज्ञया नरकेषु[13], पातयति । तद् बिलं[14] चतुःसहस्रम् ।

---

1. एष शब्दो लुप्तः - प्रा-1 प्रा-2
2. संदशः - अ
3. काः - प्रा-1, प्रा-2
4. वैतरणीवपा - अ
5. प्राणरोधः - चेन्नै
6. भागवतोक्तरीत्या इयं व्यवस्था कृतेत्यनुसन्धेयम् । तथा हि - वज्रकण्टकशाल्मली इत्येक एव नरक नाम ।
7. मम् - प्रा-1, प्रा-2
8. नं - प्रा-1, प्रा-2
9. नं - प्रा-1, प्रा-2
10. खं - प्रा-1, प्रा-2
11. अत्र अङ्काः न लिखिताः - प्रा-1, प्रा-2 । अङ्काः नामोल्लेखानन्तरं लिखिताः - अ । 15 तथा 28 एतौ द्वौ अङ्कौ लुप्तौ - अ
12. तेपु नरकेपु - अ
13. 'नरकेपु' - नास्ति - अ
14. दलं - अ

'एवं लक्षदलं[1] प्रोक्त[2] भूकन्दं जलमध्यगम् ।
अष्टानामपि लोकानां विस्तारो भूमिवद् भवेत्' ।। इति ।

ततोऽधः खण्डकर्परपर्यन्तं[3] लक्षोनपञ्चविंशतिकोटि[4]जलम् । तदेव गर्भोदकमित्युच्यते ।

[ब्रह्माण्डधारभूतौ विष्णु-वायुकूर्मौ]

जलमध्ये विष्णुः[5] कूर्मः । तदुपरि वायुकूर्मः । प्राङ्मुख ईशान्ये आग्नेय्ये[6] च तस्य वाहू । नैर्ऋते[7] वायव्ये च तस्य पादौ । पश्चिमे पुच्छम् । दक्षिणे उदीच्यां च तस्य पार्श्वौ । तत्पुच्छमाश्रित्य शेषोऽस्तीति द्रष्टव्यम्[8] । तस्येदं क्षितिमण्डलं भगवतोऽनन्तमूर्तेः सहस्रशिरसः एकस्मिन्नेव शिरसि[9] ध्रि[10]यमाणं सर्षप इव लक्ष्यते । तदन्तर्गतसंकर्षणं रुद्र उपास्ते ।

---

1. मिदं - प्रा-2
2. पोक्तं - अ
3. अण्डं पर्यन्तं - अ
4. ट्यः - अ
5. ष्णु - अ
6. आग्नेए - अ
7. निऋतौ - अ
8. शेषोऽस्ति - अ
9. शीर्षे - अ
10. ध्री - प्रा-1, प्रा-2

[द्वीप-वर्षादिनिरूपणम्]

एवं भूमेरधः पञ्चविंशतिकोटयः । [श्रीजम्बूद्वीपलक्षणं][1] पञ्चाशत्कोटिविस्तीर्णभूमण्डलमध्ये मण्डलाकारेण जम्बूद्वीपः तिष्ठति[2] । तन्मध्ये षोडशसहस्रविस्तारेण मेरुरस्ति । मेरोः परितो नवसहस्रयोजनविस्तारं चतुस्त्रिंशत्सहस्रदीर्घं चतुरस्रमिलावृतं वर्षम् । मेरोर्दक्षिणभागे इलावृतवर्षात् परितः[3] [द्विसहस्रयोजनविस्तारः।][4] रेखारूपेण लक्षयोजनः द्विसहस्रयोजनविस्तारः[5] पूर्वपश्चिमसमुद्रावधिः । निषादाख्यो[6] मर्यादागिरिः ।

ततो नवसहस्रयोजनं विस्तारं[7] [पूर्वपश्चिमसमुद्रावधि हरिवर्षम् । ततो द्विसहस्रयोजनविस्तारः][8] रेखारूपेण 'नवतिसहस्र'[9] योजनः[10] पूर्वपश्चिमसमुद्रावधिः हेमकूटपर्वतः[11] । ततो द्वि[12]सहस्रयोजनविस्तारं[13]

---

1. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
2. 'तिष्ठति' - नास्ति - अ
3. परतः - अ
4. आवरणान्तर्गतो भागः नास्ति - अ
5. लक्षयोजनतः -
6. 'निपादाख्यो'- नास्ति, तत्स्थले त्रयो बिन्दवः द.।।ः - अ
7. नवसहस्रविस्तारः - अ
8. आवरणान्तर्गतो भागः नास्ति - अ
9. लक्ष - अ
10. योजनतः - अ
11. हरिवर्षः - अ
12. नव - प्रा-1
13. योजनवद् - अ

रेखारूपेण नवतिसहस्रयोजनः[1] पूर्वपश्चिमसमुद्रावधिः हेमकूटनामको मर्यादागिरिः । ततो नवसहस्रयोजनविस्तारः । रेखारूपेण नवतिसहस्र – योजनः पूर्वपश्चिमसमुद्रावधि किंपुरुषखण्डः[2] । ततो द्विसहस्रयोजन – विस्तारो'ऽशीतियोजनदीर्घः'[3] पूर्वपश्चिमसमुद्रावधिः हिमपर्वतः[4] । ततो नव – सहस्रयोजनविस्तारवद्[5] धनुराकारेण[6] 'अशीतियोजनः'[7] भरतवर्षम् ।

एवम् उत्तरभागे[8] रम्यकहिरण्मयकुरुसंज्ञकवर्षाणि नवसहस्रयोजन – विशालानि क्रमेण[9] द्वयं रेखारूपेण अन्त्यवर्षं धनुराकारेण लक्षनवतिअशीति – सहस्र[10] योजनतः पूर्वपश्चिमसमुद्रावधिकानि सन्ति ।

तथा द्विसहस्रयोजन'विस्ताराः'[11] 'रेखारूपेण लक्ष'[12] नवतिअशीति – सहस्र[13]योजनतः पूर्वपश्चिमसमुद्रावधयो नीलश्वेतशृङ्गाचलाः सन्ति ।

---

1. 'नवतिसहस्रयोजनः' - नास्ति - प्रा-1, प्रा-2
2. किंपुरुषवर्षम् । - प्रा-1
3. रेखारूपेणास्तीति सहस्रयोजनतः - अ
4. हिमवत्पर्वतः - अ
5. रः - प्रा-1, प्रा-2
6. धनुराकारे - अ
7. अशीतिसहस्रयोजनतः पूर्वपश्चिमसमुद्रावधि - अ
8. मेरोरु.ारतो - अ
9. 'क्रमेण'- नास्ति - प्रा-1, प्रा-2
10. 'सहस्र' - नास्ति - प्रा-1, प्रा-2
11. विशालाः - अ
12. एतन्नास्ति - अ
13. 'सहस्र' - नास्ति - प्रा-1, प्रा-2

मेरोः पूर्वभागे इलावृतानन्तरं द्विसहस्रयोजनविशालो रेखारूपेण[1] नीलनिषधायतो गन्धमादनगिरिः[2] ।

[तत एकत्रिंशत्सहस्रयोजनतो रेखारूपेण नीलनिषधायतं भद्राश्ववर्षमस्ति । मेरोः पश्चिमभागे इलावृतानन्तरं द्विसहस्रयोजनविशालः नीलनिषधायतो माल्यवद्गिरिः ।][3] तत एकत्रिंशत्सहस्रयोजनविशालं नीलनिषधान्तं[4] केतुमालाख्यं वर्षमस्ति ।

मेरोर्दक्षिणभागमारभ्य सागरपर्यन्तं चतुर्णामिलावृतादिखण्डानां षट्त्रिंशत्सहस्रयोजनानि[5] । त्रयाणां मर्यादा गिरीणां षट्सहस्रयोजनानि च[6] । मेर्वधिष्ठितषोडशसहस्रमध्येऽष्टसहस्रयोजनग्रहणात् 'मेरुमारभ्य दक्षिणसमुद्रपर्यन्तं'[7] पञ्चाशत्सहस्रयोजनानि सिद्ध्यन्ति[8] । एवं मेरोरुत्तरप्रदेशेऽपि द्रष्टव्यम् ।

मेरोः पूर्वभागमारभ्य सागरपर्यन्तं मेर्वधिष्ठितषोडशसहस्रयोजन[9] मध्ये 'अष्टसहस्रयोजनानि'[10] इलावृतस्य नवसहस्रयोजनानि । गन्धमादनस्य

---

1. 'लो रेखारूपेण' - नास्ति - प्रा-1, प्रा-2
2. माल्यवद्गिरिः - अ
3. आवरणान्तर्गतो भागो नास्ति - अ
4. लनीलनिषधायताख्यं - अ
5. षट्त्रिंशत्सहस्राणि - अ
6. 'च' - नास्ति - प्रा-1, प्रा-2
7. अष्टसहस्रयोजनानि चेति - अ
8. 'सिद्ध्यन्ति' - नास्ति - प्रा-1, प्रा-2
9. 'योजन'-नास्ति - अ
10. अष्टसहस्रयोजनग्रहणात् अष्टसहस्राणि - अ

द्विसहस्रयोजनानि । भद्राश्वखण्डस्य[1] एकत्रिंशत्सहस्रयोजनानि चेति । मिलित्वा पञ्चाशत्सहस्रयोजनानि सिद्ध्यन्ति । एवं पश्चिमभागेऽपि द्रष्टव्यम् ।

[जम्बूद्वीपः]

जम्बूद्वीपः समस्तानाम् एतेषां मध्यतः स्थितः ।
तस्यापि मेरुर्मैत्रेय मध्ये कनकपर्वतः ।
चतुरा[2]शीतिसा[3]हस्रयोजनैस्तस्य चोच्छ्रयः[4] ।
प्रविष्टः षोडशाधस्ताद् द्वात्रिंशन्मूर्ध्नि विस्तृतः ।
मूले षोडशसाहस्रविस्तार[5]स्तस्य भूभृतः ।
भूपद्मस्यास्य शैलोऽसौ कर्णिकाकारसंस्थितः ।
सहस्रद्वितयाच्छ्रायाः[6] तावद् विस्तारिणश्च ते ।
वर्षाणां भारताद्यानां मर्यादा गिरयः स्मृताः ।
इलावृतस्य मध्येऽपि[7] मेर्ववष्टम्भभूधराः ।
उच्छ्रिता दश[8]साहस्रयोजनैश्च चतुर्दशम् ।

---

1. भद्राश्वकण्ठस्य - प्रा-1, प्रा-2
2. रर - अ, प्रा-2
3. स - प्रा-1, प्रा-2
4. योजनस्तस्प(स्तत्प?)ञ्चोच्छ्रयः - अ
5. विस्तर - अ
6. च्छ्रेयाः - प्रा-1, प्रा-2
7. तु - अ
8. ह्यत्र - अ

पूर्वे तु मन्दरो नाम दक्षिणे मेरुमन्दरः ।
सुपार्श्वः पश्चिमे पार्श्वे कुमुदश्चोत्तरे स्मृतः ।
तेषु चूततरुर्जम्बू कदम्बो वट एव च ।
एकादश शतायामास्तावद्विस्तृतशाखिनः ।
शतयोजनविस्तीर्णाः ह्लदास्तेषु व्यवस्थिताः ।
पयोमध्विक्षुसुरसः शुद्धतोयेन पूरिताः ।
संस्पर्शमात्रतो दिव्यदेहतापादकाः[1] स्मृताः ।
नन्दनं त्वपरं चैत्ररथं वैभ्राजनामकम् ।
सर्वतोभद्रमिति तेष्वचलेषु वनानि च ।
मन्दरोत्संगसंलग्ना एकादशशतोच्छ्रयात् ।
पतन्ति चूतवृक्षाग्रादतिस्थूलानि सर्वतः[2] ।
फलानि शीर्यमाणानि सुधाकल्परसेन च ।
अरुणोदा नाम नदी पूर्वेलावृतमध्यगा ।
एकषष्ट्य[3]धिकारत्निशताष्टकमितानि च ।
जम्बूफलानि ज्ञेयानि वृक्षाग्रात् पततां[4] गिरौ ।
तेषां विशीर्यमाणानां रसोऽमृतमयो भवेत्[5] ।

---

1. तापादिकाः - प्रा-1, प्रा-2
2. पतन्ति तस्माद् वृक्षाग्रादतिस्थूलानि सर्वशः - अ
3. ष्टि - प्रा-1, प्रा-2
4. वृक्षाग्रासनतां - प्रा-1
5. फलोऽमृतमयोऽभवत् । - अ, प्रा-2

तद्रसेनावह[1] ञम्बूनदी विबुधसेविता ।
मेरुमन्दरशैलाग्रान्निपतन्ति धरातले ।
जरादिसुखदुःखघ्नी[2] दक्षिणेलावृतं ययौ ।
सुपार्श्वरूढकादम्बकोटरेभ्यो विनिःसृताः ।
पञ्चहस्तायता[3] पञ्च'मधु'[4]धाराः स्रवन्ति हि ।
पश्चिमेलावृतजनान्मोदयन्ती सुधोपमाः ।
कुमुदाचल[5]संलग्नात्[6]वटस्कन्धाद्[7] विनिःसृताः ।
पयोदधि[8]घृतादीनां नद्यः[9] कामदुघा अधः[10] ।।
[पतन्तः[11] कुमुदात्सौम्य उत्तरेलावृतं ययुः ।][12]
कुरङ्ग[ः] कुररश्चैव[13] वैकङ्कोऽथ कुसुम्भवः[14] ।

---

1. हे - अ
2. जरा हि दुरवस्थाद्रि - प्रा-1, प्रा-2
3. हताः - अ
4. -पञ्च - अ
5. कुमुदाच - प्रा-1
6. ग्न - प्रा-1, प्रा-2
7. वटस्कन्धा - प्रा-1, प्रा-2 ; वटस्कन्ध - अ
8. मधु - प्रा-2 ; चेन्नै
9. नदाः - प्रा-1, प्रा-2
10. अथ । - प्रा-1, प्रा-2
11. न्तिः - प्रा-1
12. आवरणान्तर्गतो भागः नास्ति - अ
13. कुरवश्चैव - अ
14. कुसंभकः - प्रा-1

त्रिकूट[1] इ(टे)ति पञ्चैते पूर्वस्थाः केसराचलाः ।
पतङ्गशिखरोत्सङ्गनिषधोऽसितवाहकः[2] ।
एते दक्षिणतः सन्ति पञ्च केसरपर्वताः[3] ।
कपिलः शङ्खवैडू[4]र्यो[5]चारुधिः[6] हंससञ्ज्ञकः ।
मेरु[7]पश्चिमदेशस्था[8]वृषभो नाम नाग[9]कः[10] ।
कालाञ्जरो नारदाख्यः[11] उत्तरे केसराचलाः ।
जठरो[12] देवकूटश्च द्विसहस्रपृथून्नतौ ।
[अष्टादशसहस्राणि दक्षिणोत्तरमायतौ ।][13]
इलावृतप्रदेशेषु मेरोः पूर्वमवस्थितौ ।
[एवं पश्चिमभागेऽपि पवनः पारियात्रकः ।

1. चित्रकूट - प्रा-1, प्रा-2
2. निषेधोऽसितवासुकः - अ
3. मेरोर्दक्षिणतः पञ्च सन्ति केसरपर्वताः - अ
4. दु - प्रा-1
5. र्य - अ
6. दिः - अ
7. रोः - अ
8. स्थ - प्रा-1
9. म - प्रा-1, अ
10. काः - अ
11. कोलो जनो नारदाख्य - प्रा-1, प्रा-2
12. जडरो - प्रा-1 ; जटरो - प्रा-2
13. आवरणान्तर्गतो भागो नास्ति - प्रा-1, प्रा-2

इत्युभौ तिष्ठतो मेरोः दक्षिणस्यां तथा दिशि ।][1]

कैलासकरवीराख्यौ प्राक्पश्चादायतावुभौ[2] ।

एवमुत्तरतः शृङ्ग[3]मकरावेवमद्रयः ।

परिस्तरणरूपेण तिष्ठन्त्यष्टौ चतुर्दिशम्[4]

योजनायुतविस्तीर्णब्रह्मणो मेरुमूर्धनि ।

शतकोटिरिति ख्याता[5] शातकुम्भमयी पुरी ।

[ब्रह्मसदनमध्ये विष्णुसदनम् अन्येषां देवानां सदनानि च]

तस्याः समन्ततश्चाष्ट[6] दिशासु[7] विदिशासु च ।

इन्द्रादिलोकपालानां प्रख्याताः प्रवराः पुराः[8] ।

ब्रह्मपुर्याश्चतुर्थांशपरिमाणयुताश्च ताः[9] ।

पूर्वाऽमरावती नाम पुरीन्द्रस्य प्रकीर्तिता[10]

तेजोवती पुरा[11] ज्ञेया याम्या संयमनी पुरी ।

---

1. आवरणान्तर्गतो भागः नास्ति - अ
2. प्रास्यश्चादायतावुभौ - अ
3. सृङ्ग - अ
4. र्दशम् । - प्रा-1, प्रा-2
5. 'ख्याता' - नास्ति - प्रा-1, प्रा-2
6. श्चाष्टौ - प्रा-1, प्रा-2
7. दशासु - प्रा-2
8. पुरः - अ, प्रा-2
9. स्तु ताः - अ
10. प्रवर्तिना । - प्रा-1, प्रा-2
11. परा - प्रा-1, प्रा-2

रक्षोवती राक्षसा पूर्निम्लोचन्यथ वारुणी ।
वायोर्गन्धवती[1] ख्याता पुरी सौम्या विभावरी ।
यशस्विनी[2] भवस्योक्ता चित्रगोपुरतोरणा ।

अष्टदिक्पालकगृहब्रह्मसदनयोर्मध्ये समन्तादष्टसहस्र-योजनप्रदेशो नानावृक्षलतादिभिर्विराजते ।

तन्मध्ये दिक्पालकानां[3] ब्रह्मसदन[4] प्रतिगमनाय[5] अष्टौ मार्गाः[6] । द्विसहस्रविस्तीर्णाः सन्ति[7] ।

[गङ्गावतरणम्]

विष्णुपादविनिष्क्रान्ता प्लावयित्वेन्दुमण्डलम् ।
समन्ताद् ब्रह्मणः पुर्याः[8] गङ्गा पतति पावनी ।
सीता चालकनन्दा च चक्षुर्भद्रेति सा पुनः ।
चतुर्धा तु विभक्तोद[9] वाहेति सरितां पतिम् ।

---

1. पयो गन्धवती - प्रा-1, प्रा-2
2. यशस्वनी - प्रा-1
3. दिक्पालानां - अ
4. नम् - अ
5. गमनाय - प्रा-1, प्रा-2
6. 'अष्टौ मार्गाः'नास्ति - अ
7. 'सन्ति' नास्ति - प्रा-1, प्रा-2
8. पुर्यां - अ
9. चतुर्धा प्रविभक्ताऽथ - अ

सीता तु ब्रह्मसदनात् पूर्वकिसरपर्वतान्[1] ।
अतीत्य पूर्ववर्षेण भद्राश्वा[2]नेति चार्णवम् ।
[तथैवालकनन्दाऽपि दक्षिणेनेत्य भारतम् ।
प्रयाति सागरं सप्त भागयुक्ताघमर्दिनी ।
चक्षुः पश्चिमगिरीनतीत्य सकलास्ततः ।
केतुमालं समभ्येत्य वर्षं सागरमेत्यसौ ।
भद्रोत्त[र]गि[रिं] तीर्त्वा कुरुवर्षेण चार्णवम् ।][3]
जम्बूद्वीपस्य चाग्नीध्रः राजा तु परिपालकः[4] ।
नाभिः किंपुरुषश्चैव[5] हरिवर्ष[6] इलावृतः ।
रम्यो हिरण्मयः षष्ठः[7] पूरुः भद्राश्व एव च ।
केतुमाल इति ख्याताः अग्नीध्र[8]तनया नव ।
वर्षाणां भारताद्यानां पालकाः परिकीर्तिताः[9] ।

---

1. तात् - अ
2. श्वे - अ
3. आवरणचिह्नान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
4. एतन्नास्ति - अ
5. स्यैव - प्रा-1, प्रा-2
6. हरिवप - अ ; हरिवर्ण - प्रा-1, प्रा-2
7. पट्ठः - अ
8. आग्नीध्र - प्रा-1, चेन्नै - 1
9. समुदीरिताः । - प्रा-1, प्रा-2

[भारतवर्षम्]

उत्तरं यत्[1] समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।
वर्षं तद् भारतं नाम नवसाहस्रविस्तृतम् ।
कर्मभूमिरियं स्वर्गम् अपवर्गं च[2] गच्छताम् ।

[अष्टसु वर्षेषु उपासकाः-उपास्याश्च]

इतरेष्वष्टवर्षेषु [3]न कर्माधिकृतिर्भवेत् ।
भौमा ह्येते[4] स्मृताः स्वर्गाः भारते कृतकर्मणाम्[5] ।
भारते नारदोऽभ्येत्य नरनारायणं हरिम् ।
उपास्ते हनुमान् रामं वर्षे किंपुरुषाह्वये ।
प्रह्लादो हरिवर्षाख्ये[6] नृसिंहं भजते शिवः ।
इलावृते महाभक्त्या संकर्षणसमाह्वयम् ।
वैवस्वतो मनुर्मत्स्यं रम्ये पितृगणाधिपः ।
हिरण्मयेऽर्यमा कूर्मं[7] भूदेवी कुरुवर्षके ।
उपास्ते यज्ञवाराहं भद्राश्वे हयमस्तकम् ।
भद्रश्रवाः केतुमाले कामरूपं हरिं रमा ।

---

1. तत् - अ
2. चैव - अ
3. अत्र 'पु' 'न' एतयोरक्षरयोर्मध्ये 'पु' इत्येतदक्ष-रमधिकम् - प्रा-1
4. द्येते - प्रा-1, प्रा-2
5. कृतकर्मणि - प्रा-1, प्रा-2
6. हरिवर्षाख्यो - प्रा-1, प्रा-2
7. हिरण्मयेर्यमाकूर्मं - प्रा-1, प्रा-2

[भारते महाचलाः]

भजते भारते वर्षे तत्र सन्ति महाचलाः ।
मलयो मङ्गलप्रस्थो[1] मैनाकोऽथ त्रिकूटकः[2] ।
ऋष्यमूको वेङ्कटश्च[3] श्रीशैलोऽथ महेन्द्रकः ।
गोवर्धनश्चित्रकूटो विन्ध्यो रैवतपर्वतः[4] ।
अन्येऽपि बहवः सन्ति तत्र तत्र सहस्रशः ।

[भारते नद्यः नदाश्च]

एषां[5] नितम्बप्रसवाः नद्यः[6] सन्ति नदा अपि[7] ।
नदी वटोदकानाम्नी[8] कावेरी ताम्रपर्णिनी ।
कृष्णवेणी भीमरथी गोदावर्यभिधा नदी ।
तुङ्गा भद्रा[9] च निर्विन्ध्या रेवा चर्मण्वती नदी ।
मन्दाकिनी च यमुना गोमती च सरस्वती ।

---

1. प्रख्यो - प्रा-1, प्रा-2
2. मैनाकश्चित्रकूटकः - प्रा-2, मैनाकोऽथ चित्रकूटकः - प्रा-1
3. विकूटाद्रिः - अ
4. विन्ध्यरैवतपर्वतौ - अ
5. तेषां - अ
6. धन्यो - अ
7. सहस्रशः - अ
8. नानी - प्रा-1
9. तुङ्गभद्रा - प्रा-1, प्रा-2

लोकाघहारिका[1] ह्येता[2] अघशोणौ महानदौ ।
जम्बूद्वीपसमानेन[3] क्षारेणोदधिना वृतः[4] ।

[प्लक्षादयो द्वीपाः]

द्विगुणयोजनविस्तीर्णः प्लक्षद्वीपस्ततः स्मृतः ।
'तत्रातिष्ठत्तु प्लक्षाख्यः वृक्ष एकादशोच्छ्रयः ।
तावदायामशाकश्च समस्तद्वीपनामकृत्'[5] ।
हिरण्मयो यत्र हुतभुगुपास्ते[6] हरिमव्ययम् ।
इध्मजिह्वोऽधिपस्तत्र[7] विभज्य स च सप्तधा[8] ।
पुत्रेभ्यो वर्षनामभ्यः प्रायच्छद्धि[9] गतस्पृहः ।
शिवं यशस्यमपरं सुभद्रं शान्तनामकम् ।
मोक्षाख्यममृतं[10] वर्षमभयाह्वं तु सप्तमम् ।

---

1. लोकापह्रारिका - प्रा-1
2. ह्येता - प्रा-1, प्रा-2
3. जम्बूद्वीपश्च मानेन - प्रा-1
4. वृतां - अ
5. तत्र प्लक्षवृक्षः एकादशशतोच्छ्रितः । तावदायामश्च । - प्रा-1, प्रा-2
6. यत्रोपास्ते - प्रा-1, प्रा-2
7. इध्नजिंह्वोधिपस्तस्य - प्रा-1 ; सुधामिह्वोधिपपुः(?) - प्रा-2
8. सप्तथा - अ
9. द्वै - अ
10. क्षेमाष्टममृतं - प्रा-1, प्रा-2

मर्यादागिरयो नद्यस्तत्र सप्तैव संस्थिताः[1] ।
मणिकूटो वज्रकूट[2] इन्द्रसेनाचलस्तथा ।
ज्योतिष्मान् धूम्र[3]वर्णाख्यो हिरण्यग्रीवनामकः[4] ।
मेघमाला[5] इति ख्याता अरुणा विमला[6] नदी ।
आङ्गीरसी[7] च सावित्री सुप्रभाता ऋतम्भरा[8] ।
सत्यंभरेति वै सप्त नद्यः सन्ति सुशोभनाः ।
एतद्द्वीपस्थिताः सूर्यस्थितं हरिमुपासते ।
समानेक्षुरसोदेन प्लक्षद्वीपः समावृतः ।
ततो द्विगुणविस्तीरः[9] शाल्मलीद्वीप ईरितः ।
तत्रास्ते[10] शाल्मलीवृक्षः एकादशशतोच्छ्रितः ।

---

1. संस्मृताः - अ
2. 'वज्रकूट'- नास्ति - अ
3. धर्म - प्रा-1, प्रा-2
4. हिरण्यो ग्रीवनामकः - प्रा-1, प्रा-2
5. मेघमाल - अ
6. अरुणाऽनुगुणा नदी इति भवितव्यम् । अन्यथा सत्यत्वासम्भवात् । भागवत-विरोधाच्च ।
7. अङ्गीरासा - अ
8. ऋतुम्भरा - प्रा-1, प्रा-2
9. विस्तीर्णा - प्रा-1, प्रा-2
10. तत्रैव - प्रा-1, प्रा-2

तावदायामश्च । एवं सर्वद्वीपेषु वृक्षादिपरिणाहो[1]न्नाहो[2] ज्ञातव्यः । तत्र गरुडः आस्ते । उपास्यः सोमः ।

तस्य यज्वबाहुः राजाधिपतिः[3] ।

पुत्रनामानि वर्षाणि पुत्रेभ्यः सप्तभ्यो ददौ[4] ।

सुरोचनं सौमनस्यं तथा रमणकाह्वयम् ।

देवभद्रं पारिभद्रम् अभिजातं[5] तथाऽपरम्[6]

आप्यायनमिति ख्यातं सप्तमं तत्र पर्वतम्[7] ।

सुरसः शतशृङ्गोऽथ वामदेवोऽथ कुन्दरः[8] ।

मुकुन्दः पुष्पवर्षश्च सहस्रश्रुतिरितीरिताः ।

नदी हनुमतिर्नाम[9] सिनीवाली[10] सरस्वती ।

कुहूश्च[11] रजनी नन्दा[12] राकाख्या[13] सप्तमी नदी ।

---

1. माणो - प्रा-1, प्रा-2
2. हं - प्रा-1
3. तस्येध्मबाहुराजा पतिः - अ ; तस्येध्मबाहू राजा पतिः - प्रा-1, प्रा-2
4. सप्त सन्ददौ - प्रा-1, प्रा-2
5. अभिवर्षं - अ ; सभिवर्हं - प्रा-1
6. अथापरम् - अ
7. पर्वताः । - प्रा-1, प्रा-2
8. कन्दुकः - अ
9. वनुसती नाम - प्रा-1 ; त्वनुसतिर्नाम - प्रा-2
10. शिनिवाली - प्रा-1, प्रा-2
11. हूहूश्च - प्रा-1, प्रा-2
12. नक्तं - अ, प्रा-2
13. स्या - अ

एतद्द्वीपस्थिताः सोमस्थितं[1] हरिमुपासते ।
स्वसमानसुरोदेन ह्ययं द्वीपः समावृतः ।
तस्माद् द्विगुणविस्तीर्णः कुशद्वीप इतीरितः[2] ।
कुशस्तम्भो देवकृतो यत्र तद्द्वीपनामकृत् ।
हिरण्यरेता अधिपः पुत्रेभ्यः समदात् स्वयम् ।
विभज्य सप्तवर्षाणि पुत्रनामाङ्कितानि हि[3] ।
प्रथमं वसुदानाह्वं[4] दृढं च ऋचिनामकम्[5] ।
नाभिं गुप्तं तथा सत्यव्रतं[6] विप्राख्यमेव च ।
वामदेवं तेषु सीमा गिरयः सप्त चापगाः ।
चक्राख्यः कपिलः शृङ्गः छिन्नकूटोऽपरस्तथा ।
देवनीकस्तूर्ध्वरोमा[7] द्रविणः सप्तमः स्मृतः[8] ।
रसकुल्या[9] मधुकुल्या श्रुतविन्दाभिधा नदी[10] ।

---

1. तद्द्वीपुरुषाः सोमग'तं - प्रा-1, प्रा-2 ; 'ग' इत्यक्षरं नास्ति - प्रा-1
2. उदाहृतः - अ
3. च - अ
4. ख्यं - अ
5. दध्ना च ऋचिनामकम् ।
6. सत्यव्रतं वामं - प्रा-1
7. म - प्रा-1, प्रा-2
8. सप्त संस्मृताः - अ
9. रसकल्पा - प्रा-1, प्रा-2
10. श्रुतविधान्तिदागदी । - प्रा-1, प्रा-2

मित्रविन्दा देवगर्भा[1] घृत[2]च्युतसमाह्वया ।
मन्त्रमालेति सरितः सप्तपावनतोयकाः ।
कुशद्वीपस्थिता वह्नि[3]स्थितं हरिमुपासते ।
कुशद्वीपो घृतोदेन[4] समानेनावृतस्ततः ।
क्रौञ्चद्वीपो द्विगुणितो यत्र क्रौञ्चो महाचलः ।
घृतपृष्ठोधिपस्तस्य ह्यामोदो मरुदाह्वयः[5] ।
मेघपृष्ठः सुधामाख्य[6] ऋषिज्वा लोहितार्णकः ।
वनस्पतिरिति ख्याताः पुत्रास्तेभ्यो विभज्य सः ।
सप्तवर्षाणि तन्नाम वाच्यानि प्रददौ नृपः ।
शुक्लोऽथ वर्धमानाख्यः[7] उपबर्हणनामकः ।
उपभोजनो नन्दनामा[8] नन्दनश्चापरः स्मृतः ।
सर्वतोभद्र इति तेष्वचला[9] वर्षभेदकाः[10] ।

---

1. वेदगर्भा - प्रा-1
2. धृत - प्रा-1
3. अह्नि - अ
4. च्छ्रितोदेन - अ
5. मरुदादयः - अ
6. स्वनामाख्य - अ ; सुदामाख्यो - प्रा-1
7. वर्तमानाख्यः - अ ; वर्धमानाख्या - प्रा-1, प्रा-2
8. म - प्रा-1
9. लो - अ
10. कः - अ

अभया त्वमृतौघाख्यो[1] आर्यकाख्यापराः स्मृताः[2] ।
नदी तीर्थवती वृत्तिः रूपवत्यभिधा परा[3] ।
पवित्रा शुक्लवत्याख्या[4] नद्यः सप्त वसन्ति हि[5] ।
क्रौञ्चद्वीपस्थिता वारि स्थि[6]तं हरिमुपासते ।
क्रौञ्चोदधिसमुद्रेण समानेन समावृतः ।
द्वात्रिंशल्लक्षविस्तीर्णः शाकद्वीपस्ततः स्मृतः ।
शाकनामा वनरुहो[7] यत्र तत्क्षेत्रनामकृत्[8] ।
[विस्तरोन्नाहः पूर्ववत्][9]
पतिर्मेधातिथिस्तस्य सप्तवर्षाण्यदात् स्वयम् ।
तन्नामाङ्कितपुत्रेभ्यः[10] पुरोजवमनोजवौ ।
वेपमानाभिधो[11] धूम्रनामाख्यश्चित्ररेखकः[12]

---

1. त्वमृतोदाख्या - अ
2. अर्चकाख्या परा स्मृता - अ
3. वृ.ारूपवत्सभिदा पुरा । - प्रा-1, प्रा-2
4. शुक्लकन्याख्या - अ
5. सप्तैव सन्ति हि - अ
6. 'स्थि' इत्यक्षरं नास्ति - प्रा-1
7. वनिरुहो - अ
8. यत्क्षेत्रनामकृत् - अ
9. आवरणान्तर्गतो भागः नास्ति - अ
10. तन्नामकेभ्यः पुत्रेभ्यः - अ
11. लेपमानाभिधो - अ
12. रेफकः । - प्रा-1, प्रा-2

बहुरूपो विश्वधारो[1] मेधातिथिसुता इमे ।
ईशानउरु[2]शृङ्गाख्यः बलभद्राभिधस्तथा[3] ।
शन्तकेसरिसाहस्रौ देवपालो[4] महानसः[5] ।
एते वर्षाचलाः सप्तानघा[6] पुरभिदा[7] नदी ।
उभय[8]सृष्टिरपराजिता । पञ्चनदी तथा ।
सहश्रुतिर्निर्जितेति नद्यः[9] सप्त च[10] संस्थिताः ।
भजन्ते तद्वर्षजनाः वायुसंस्थं[11] रमापतिम् ।
शाकद्वीपस्स्वप्रमाणः क्षीरवारिधिसंवृतः ।

[क्षीरसागरे श्वेतद्वीपः]

द्वात्रिंशल्लक्षविस्तृतक्षीराब्धिमध्ये[12] विंशलक्षयोजन[13]विस्तृतः श्वेतद्वीपः

---

1. धारो - अ, प्रा-2
2. गुरु - प्रा-2
3. बलभद्रादिभिस्तथा - अ
4. बहुरूपोलो - प्रा-2
5. शन............अत्र ग्रन्थपातः वर्तते - प्रा-1
6. लास्तत्र नद्या - अ
7. धा - अ
8. या - अ
9. सहश्रुतिर्निजघृतिर्नद्यः - प्रा-1, प्रा-2
10. सप्तश्च - अ
11. वायुस्थित - अ
12. मध्य - अ
13. विशल्लक्ष - अ

परितो वलयाकारेण[1] वर्तते । तत्र षड्लक्षः भूभागविस्तारः[2] मध्ये अष्टलक्षः श्रीभागविस्तारः[3] ततः परं षड्लक्षः दुर्गाभागः । श्वेतद्वीपोच्छ्र[4]यः पञ्चाशल्लक्षः श्रीभूभागयोर्मध्ये[5] अरनामा[6] सुधासमुद्रः । लक्षयोजनविस्तृतः । श्रीदुर्गाभागयोर्मध्ये ण्यनामा सुधासमुद्रः । लक्षयोजनविस्तृतः । उभावपि समुद्रौ मुक्तामुक्तसेवितौ ।

तत्र मुक्तसेवितश्रीभागस्थितसमुद्रस्य न[7] नाशः । अमुक्तसेवितभूभागस्थितसमुद्रस्य नाशः । एवं ण्यसमुद्रेऽपि द्रष्टव्यम् । प्रलये[8] भूदुर्गाभागयोर्नाशः । श्रीभागस्य तु[9] नाशो नास्ति ।

[हरेरपराजितास्यं गृहम्]

तत्र परमात्मनोऽपराजितनामकं[10] गृहम् । तत्र स्थितं वासुदेवं ब्रह्मा उपास्ते ।

---

1. विस्तृतश्वेतद्वीपो परिमितो वलयाकारे - अ
2. भूभागः - प्रा-1, प्रा-2
3. श्रीभागः - प्रा-1, प्रा-2
4. च्छ्रा - प्रा-1, प्रा-2, चेन्नै
5. श्रीभागभूभागयोर्मध्ये - अ
6. अरनाम - चेनै
7. 'न' नास्ति - अ
8. 'प्रलये' नास्ति - प्रा-1, प्रा-2
9. 'तु' नास्ति - प्रा-1, प्रा-2
10. 'पराजितनामकं' नास्ति - प्रा-1, प्रा-2

तत्र पूर्वभागे त्रीणि द्वाराणि । तत्र[1] प्रथमद्वारे महालक्ष्मीः । द्वितीयद्वारे द्युशब्दवाच्या भारती । सूर्यः प्राणः चक्षुस्तथादित्य इति[2] रूपत्रयेण सूर्यो वर्तते[3] । चरमद्वारे[4] जयविजयौ ।

दक्षिणस्यां[5] त्रीणि[6] द्वाराणि । प्रथमद्वारे[7] महालक्ष्मीः । द्वितीयद्वारे[8] दिक्शब्दवाच्या भारती । सोमव्यानः श्रोत्र इति रूपत्रयेण चन्द्रस्तिष्ठति[9] । चरमद्वारे[10] नन्दसुनन्दौ । पश्चिमे त्रीणि । प्रथमे महालक्ष्मीः । द्वितीये पृथिवीशब्दवाच्या भारती । वह्निरपानो वागिति रूपत्रयेणाग्निः । चरमे कुमुदकुमुदाक्षौ । उत्तरे त्रीणि द्वाराणि[11] । प्रथमे महालक्ष्मीः । द्वितीये विद्युच्छब्दवाच्या[12] भारती। इन्द्र उदानः समान[13] इति रूपत्रयेण इन्द्रो वर्तते । चरमे बलप्रबलौ । ऊर्ध्वमेकद्वारम्[14] । तत्र

---

1. 'तत्र' नास्ति - प्रा-1, प्रा-2
2. चक्षुरिति - प्रा-1, प्रा-2
3. रूपत्रयेण सूर्यो वर्तते - प्रा-1, प्रा-2
4. तृतीयद्वारे - प्रा-1, प्रा-2
5. दक्षिणे - अ ; दक्षिण - प्रा-1, प्रा-2
6. 'त्रीणि' नास्ति - प्रा-1, प्रा-2
7. प्रथमे - अ
8. द्वितीये - अ
9. व्यानश्रोत्रं चन्द्रमा इति रूपत्रयेण सोमः । - अ
10. चरमे - अ
11. 'द्वाराणि' - नास्ति - प्रा-1, प्रा-2
12. द्युशब्दवाच्या - प्रा-1
13. 'समान' नास्ति - अ
14. ऊर्ध्वमेकोद्धारः - प्रा-1, प्रा-2

महालक्ष्मीः । आकाशशब्दवाच्या भारती[1] । वायुरुदान इति रूपद्वयेन वायुः । एते त्रयस्तिष्ठन्ति[2] । इति क्षीरसमुद्रः ।

[पुष्करद्वीपः]

ततो द्विगुणविस्तीर्णः पुष्करद्वीप ईरितः । तत्र वरुणरूपायुतपत्र-पुष्करं[3] वर्तते । एकादशसंख्योच्छ्रितं तत्संख्यया[4] पृथु । तदुपरि [सुवर्णात्मके देवालये][5] चतुर्मुखान्तर्गत आत्मन्वी[6] नामको भगवान् । तत्स्थजनैरुपास्यो वीतिहोत्रराज[7] उपासकः । तस्य द्वीपस्य द्वौ खण्डौ[8] रमणको धामक-श्चेति । वीतिहोत्रो[9] राजा विभज्य वर्षद्वयं तन्नामकपुत्राभ्यां ददौ । तौ द्वौ वलयाकारौ । तयोर्मध्ये मानसोत्तरगिरि[10]र्वलयाकारेण वर्तते । अयुत-योजनोन्नतः तावता विस्तृतश्च ।

तत्र मार्गत्रयं वर्तते[11] । उत्तरायणमार्ग, मध्यममार्गः,[12] दक्षिणायन-मार्गश्चेति ।

---

1. सरस्वती - प्रा-1
2. तिष्ठति - प्रा-1
3. सुवर्णरूपमयुतपत्रं पुष्करं - अ
4. एकादशसंख्यया उच्छ्रितं तावद्विस्तीर्णं - अ
5. आवरणचह्वान्तर्गतो भागः नास्ति - अ
6. आत्मनि - अ
7. जा - प्रा-1, चेन्नै
8. द्वाखण्डौ - प्रा-1
9. त्र - अ
10. पर्वतः - अ
11. वर्तेते - प्रा-1
12. 'मध्यममार्गः' नास्ति - अ

तत्रोत्तरायणे ऐरावतवीथिः, मध्यमे राजवीथिः, दक्षिणायने वैखानस-वीथिः[1] । [तदुक्तं -

स्थानम् जारद्रवं मध्ये तथैरावतमुत्तरम् ।
वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः । इति।][2]

[सूर्यरथगतिः]

तासु द्वादशारं षण्ने[3]मित्रिनाभि[4] संवत्सरात्मकमेकं सौरं रथचक्रं[5] चरति । अरेषु द्वादशमासाभिमानिनः देवाः[6] । नेमिषु ऋत्वभिमानिनः[7] । तस्य[8] रथस्याक्षः[9] मेरौ अष्टदिक्पालकानां ग्रहभित्तिसंलग्नो वर्तते ।

[सार्धकोटिरयं प्रोक्तः सप्तलक्षाधिकं तथा ।
रथाक्षस्य रवेर्मेरोर्मानसोत्तरवर्तिनः ।][10]

मानसोत्तरे मेरोः पूर्वभागे देवधानी[11] नाम इन्द्रपुरी । मेरुदक्षिणे

---

1. वैखानरवीथिः प्रा - 1 ; तत्रो.ारायणे एतावद्वीधिकामध्ये जारद्रविः । दक्षिणे वैश्वानरवीथिः । - अ
2. आवरणचिह्नान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
3. द्वादशारण्ये - प्रा-2
4. मित्रिनाभिः - प्रा-1, प्रा-2
5. सौररथचक्रं - अ
6. 'देवाः' नास्ति - प्रा-1, प्रा-2
7. ऋतुनामाभिमानिनः । - अ
8. 'तस्य' नास्ति - अ
9. ऋतस्याक्षः - प्रा-1, प्रा-2
10. आवरणचिह्नन्तर्गतो भागः नास्ति - अ
11. वधानी - प्रा-1, प्रा-2

संयमनी नाम यमपुरी । तत्पश्चात् निम्लोचनी नाम वरुणपुरी । तदुत्तरत्तः[1] मानसोत्तरे विभावरी नाम सोमपुरी । तासु क्रमेणोदयमध्याह्नास्तसमय-निशीथानि[2] ज्ञेयानि ।

[रथेन साकं गन्तारः देवर्षयः]

एवं मानसोत्तरपर्वते अहोरात्रं[3] परितः भ्रममाणस्य[4] आदित्यरथ-चक्रस्य नवकोट्येकपञ्चाशल्लक्षयोजनानि[5] भवन्ति । [रथोन्नाहः षड्विंश-ल्लक्षसंख्याकः । नवलक्षविस्तृतः । तावान्[6] रथयुगः ।][7]

सप्ताश्वरूपछन्दांसि वहन्ते वांमतो धुरमिति[8] ।

वायव्येऽरुणः[9] सौत्ये[10] कर्मण्यास्ते । तथा वालखिल्या ऋषयोऽङ्गुष्ठ-

---

1. तदुत्तरे - अ
2. मध्याह्न - प्रा-1, प्रा-2
3. 'अहोरात्रं' - नास्ति - अ
4. क्रममाणस्य - अ
5. नवकाटि-एकपञ्चाशल्लक्षयोजनानि - प्रा-1 ;
   नवकोटिपञ्चाशल्लक्षयोजनानि - प्रा-2
6. तावन् - प्रा-1
7. आवरणचिह्नान्तर्गतो भागः नास्ति - अ
8. वहतो नामतो धुरमिति - अ
9. ऽरुण - अ
10. सोत्य - प्रा - 2

पर्व[1] मात्राः षष्ठिसहस्राणि पुरतः सूर्यं[2] सूक्तवाक्य[3] नियुक्ताः[4] संस्तुवन्ति[5] । तथा गन्धार्वाप्सरसादयः[6] सूर्यसंस्थं भगवन्तम्[7] उपासते । मेरोरुपरि तैलयन्त्रस्तम्भवत्[8] अधोमुखः[9] कुण्डलीभूतदेहः ऊर्ध्वपुच्छः[10] शिंशुमारः ध्रुवमण्डलपर्यन्तं वर्तते ।

[पुच्छमारभ्य सौररथपर्यन्तं कालचक्रं तैलयन्त्र-स्तम्भाश्रितकाष्ठवत् वर्तते][11]

आवह-प्रवह-उद्वह-संवह-विवह-परावह-परि-वहनामानः सप्त वायवः कालचक्रस्य प्रवर्तकाः[12] ।

[राहुमण्डलम्]

तदाधारेण नवतिसहस्रयोजनोच्छ्र्येण राहुमण्डलं वर्तते । तन्मण्डलं

---

1. 'पर्व' - नास्ति - प्रा-1, प्रा-2
2. 'सूर्यं'- नास्ति - अ ; सूर्य - प्रा-1, प्रा-2
3. वाकाय - प्रा-1, प्रा-2
4. नियुक्ताः सूर्यं - अ
5. स्तुवन्ति - अ
6. गन्धर्वाप्सरसः - अ
7. सूर्यं भगवन्तम् - अ
8. तैलयन्त्रसमभवत् - अ
9. अधोमुखः कुण्डली अधोमुखः - अ
10. च्छ - अ
11. आवरणचिह्नान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
12. आवहः, उद्वहः, संवहः, विवहः, परावहः, परिवहः एतन्नामानस्सप्त वायो कालचक्रसूत्रस्य प्रवर्तकाः - अ

त्रिंशत्सहस्रयोजनविस्तृतम् । राहुः पश्चिमभागे उदेति । अप्रादक्षिण्येन संचरन्[1] वैरेण पर्वणि सूर्याचन्द्रमसावभिधावति[2] । तदा भगवतो[3] रक्षणाय प्रयुक्तं[4] दुर्विषहं सुदर्शनं चक्रं दृष्ट्वा मुहूर्तमवस्थितः भयतः दूरान्निवर्तते । तदुपराग इति वदन्ति लोकाः[5] ।

[सूर्यमण्डलम्]

तदूर्ध्वं कालचक्राधारेण अयुतयोजनोच्छ्रितप्रदेशे सूर्यमण्डलं तिष्ठति[6] तन्मण्डलमयुतयोजनविस्तृतम्[7] ।

[चन्द्रमण्डलम्]

तदूर्ध्वं कालचक्राधारेण लक्षयोजनोच्छ्रितप्रदेशे[8] चन्द्रो वर्तते । तन्मण्डलं विंशत्[9] सहस्रयोजनविस्तीर्णम् ।

नन्वेवं चेद् भागवतविरोधः । तत्र राहुसोमयोर्मण्डलस्य[10] द्वादश-

---

1. चरन् - प्रा-1, प्रा-2
2. सूर्यचन्द्रावभिधावति - प्रा-1, प्रा-2
3. भगवता - अ
4. नियुक्तं - अ
5. ज्ञायते लोकैः - अ
6. सूर्यरथस्तिष्ठति । - प्रा-1, प्रा-2
7. विस्तीर्णम् - अ
8. लक्षयोजनप्रदेश - प्रा-1, प्रा-2
9. द्वि - अ
10. राहुसमयो मण्डलरूप - प्रा-1, प्रा-2

सहस्रं[1] सोमस्य त्रयोदशसहस्रं[2] राहोरिति द्वादशत्रयोदशसहस्रविस्तृ-तत्व[3]कथनादिति चेत् न, भागवते द्वादशसहस्रमित्यस्य द्विदशसहस्रमिति त्रयोदशसहस्रमित्यस्य त्रिदशसहस्रमित्यर्थकरणात्[4] ।

शुक्लपक्षे प्रतिपदादिषु प्रत्यहमग्नौ हविर्दानेन सोमस्य कलावृद्धिः ।

अग्नौ हुतं च दत्तं च सर्वं सोमगतं भवेत् ।
तत्र सोमः समुत्पन्नः शीतांशुर्हिमलक्षण ।। इति श्रुतेः ।

कृष्णपक्षे प्रतिपदादिषु प्रत्यहम्[5] अग्निः रविर्विश्वेदेवाः वरुणः वषट्कारः वसवः ऋषयः अजः यमः वायुः उमापितरः कुबेरः पशुपतिः प्रजापतिः - एते सर्वे क्रमेण स्वभागान्[6] गृह्णन्ति । तदा कलानां नाशः[7]

मार्गशीर्षादिद्वादशमासानां केशवादिद्वादशदेवताः ।

शुक्लपक्षाभिमानी प्राणः । कृष्णपक्षाभिमानिनी रयीनामिका भारती । प्रतिपद्यभिमानी वह्निः । 1. विरिञ्चः । 2. गुणः । 3. मारगणपती 4. शेषः । 5. स्कन्देन्द्रौ । 6. भास्करः । 7. सोमः । 8. महालक्ष्मीः । 9. वायुः वरुणः 10-12. दशम्यादिदिनत्रयस्य विष्णुः । 13. कुबेरो गरुडश्च मरुद्गणश्च यमः । 14. रुद्रः ।

---

1. द्वादशसाहस्रं - अ
2. साहस्रं - अ
3. विस्तार - अ
4. त्रिदशमित्यर्थकरणात् - प्रा-1, प्रा-2
5. 'प्रत्यहम्' - नास्ति - प्रा-1, प्रा-2
6. स्वभागानि - प्रा-1, चेन्नै ; स्वभोगानि - प्रा-2
7. कलानाशः - प्रा-1, प्रा-2

पौर्णमस्यां सर्वदेवताः । प्रतिपदादित्रिंशद्दिनेषु पुनः पुनरनिरुद्धादिनारायणान्ताः पञ्चदेवताः।][1]

[चन्द्रादुपरितना ग्रहाः]

चन्द्रादुपरि[2] लक्षयोजनोच्छ्रितप्रदेशे[3] अभिजिता सह अष्टाविंशतिनक्षत्राणि । कालचक्रे[4] तदूर्ध्वमप्रादक्षिण्येन मेषादिराशयश्चरन्ति । तदूर्ध्वं द्विलक्षयोजनोच्छ्रयेण शुक्रः[5] । तदूर्ध्वं द्विलक्षयोजनोच्छ्रयेण बुधः[6] । तदूर्ध्वं द्विलक्षयोजनोच्छ्रयेण मङ्गलः[7] । तदूर्ध्वं द्विलक्षयोजनोच्छ्रयेण[8] बृहस्पतिः । यदि न वक्रस्तदा[9] ब्राह्मणकुलस्यानुकूलः । तदूर्ध्वं द्विलक्षयोजनोच्छ्रयेण शनिः । [रविशुक्रौ पूर्वाभिमुखौ । मङ्गलराहुकेतवः दक्षिणाभिमुखाः । चन्द्रशनी[10] पश्चिमाभिमुखौ । बुधगुरू उत्तराभिमुखौ ।][11] तदूर्ध्वं एकादशलक्षयोजनोच्छ्रयेण[12] सप्तऋषयः । तदूर्ध्वं त्रयोदशलक्षयोजनोच्छ्रयेण ध्रुवः।

---

1. आवरणचिह्नान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
2. चन्द्रा उपरि - प्रा-1
3. लक्षयोजनप्रदेशे - प्रा-1, प्रा-2
4. 'कालचक्रे' - नास्ति - प्रा-1, प्रा-2
5. बुधः - अ
6. शुक्रः - अ
7. अङ्गारकः - अ
8. योजनोच्छ्रितप्रदेशे - अ
9. नक्रस्तदा - अ
10. शनिः - प्रा-1
11. आवरणचिह्नांन्तर्गतो भागः नास्ति - अ
12. लक्षोच्छ्रयेण - प्रा-1, प्रा-2

पूर्वोक्ताः सर्वे कालचक्राश्रयेण मेरुं[1] सव्यापसव्येन[2] ध्रुवमवलम्ब्य वायुनोद्दीर्यमाणाः[3] भगवदाज्ञया[4] आकल्पान्तं परिक्रामन्ति[5] ।

तदूर्ध्वं त्रयोदशलक्षोच्छ्रयेण स्वर्गः ।

[शिंशुमारदेहे उपास्याः देवाः]

शिंशुमारस्य पुच्छाग्रे ध्रुवः । पुच्छमध्ये प्रजापतिरग्निरिन्द्रो धर्म इति चत्वारः । पुच्छमूले धाता विधाता[6]। कट्यां सप्तऋषयः । पुनर्वसुपुष्यौ[7] दक्षिणवामयोः श्रोण्योः[8] । आर्द्रा[9] आश्लेषा च दक्षिणवामयोः[10] पादयोः । अभिजि[11]दुत्तराषाढे च उभयोर्नासियोः[12] श्रवणपूर्वाषाढे च लोचनयोः[13] । धनिष्ठामूले च दक्षिणवामयोः[14] कर्णयोः शतभिषग्ज्येष्ठे[15] दक्षिणवामयोः

1. मेरुपरितः - प्रा-1, प्रा-2
2. प्रदक्षिणाकारेण - अ
3. दीर्यमाणाः - प्रा-1, चेन्नै
4. 'भगवदाज्ञया' - नास्ति - प्रा-1, प्रा-2
5. परिऋमन्ति - प्रा-1, प्रा-2
6. 'विधाता' - नास्ति - अ
7. पुनर्वसुपुष्ये - अ
8. श्रेण्योः - अ
9. 'आर्द्रा' - नास्ति - अ
10. 'दक्षिणवामयोः' - नास्ति - अ
11. अरिजि - प्रा-1 ; अभिषज्ये - प्रा-2
12. दक्षिणवामयोर्मासियोः । - प्रा-1, प्रा-2
13. श्रवणपूर्वापाढदक्षिण-वामयोर्नेत्रयोः - प्रा-2 ; श्रवण....र्नेचयोः - प्रा-1
14. 'दक्षिणवामयोः' - नास्ति - अ
15. शतभिपज्ज्येष्ठा - प्रा-1, प्रा-2

स्कन्धयोः । अश्विन्यादिपञ्चकं[1] पूर्वाभाद्रादित्रिकम् । एवं[2] अष्टनक्षत्राणि दक्षिणपार्श्वे[3] सन्ध्यग्रेषु न्यसेत्[4] । मखाद्यष्टनक्षत्राणि वामपार्श्वसन्ध्यग्रेषु ।

उत्तर[5]हनावगस्त्यः । अधरहनौ[6] यमः । मुखे अङ्गारकः । शनैश्चर उपस्थे[7] । बृहस्पतिः[8] ककुदि । वक्षस्यादित्यः । हृदये नारायणः । मनसि चन्द्रमाः[9] । नाभावुशनाः[10] स्तनयोरश्विनौ । बुधः प्राणापानयोः । राहुकेतू[11] गले । रोमसु सर्वे तारागणा आश्रिताः । एतद् भगवतः शिंशुमारस्य रूपं त्रिकालं[12] ध्यायतः स्तुवतश्च[13] नश्यते त्रिकालकृतं[14] पापम् ।

---

1. कः - प्रा-1, प्रा-2
2. च - प्रा-1, प्रा-2
3. श्र्व - प्रा-1, प्रा-2
4. 'न्यसेत्' - नास्ति - अ
5. उत्तरा - प्रा-1
6. अधरा-हनौ - प्रा-1
7. उपास्ते - प्रा-1, प्रा-2
8. दि - प्रा-1, प्रा-2
9. चन्द्रः - प्रा-1, प्रा-2
10. नाभावुदानः - प्रा-1, प्रा-2
11. केतु - प्रा-1
12. 'त्रिकालं'- नास्ति - प्रा-1, प्रा-2
13. 'स्तुवतश्च' - नास्ति - प्रा-1, प्रा-2
14. कालकृतं - प्रा-1, प्रा-2

[पुष्करद्वीपः]

एष पुष्करद्वीपः । स्वतुल्यशुद्धोदेन[1] समुद्रेण[2] समावृतः[3] । तदनन्तरं सुवर्णभूमिः । षण्णवतिलक्षसंख्या[4] । उभयोः पार्श्वयोः प्रत्येकं च सप्त[5] सप्ततिसहस्रपरिमिता भूर्वज्ररत्नखचिता । तत्र श्रीनारायणो विष्वक्सेनादिपार्षदैः[6] परिवारितः लोकस्वस्तय आस्ते[7] । [लोकाचल-अलोकाचल-लोकालोकाचल-तमस्-घनोदक-अनन्तासनादयः] जम्बूद्वीपमारभ्य सुवर्णभूम्यन्तः प्रदेशः लोकनामकः ।

तावल्लोक[8] इति प्रोक्तो भानुरश्मिविलोकनात् ।
अलोकः परतः सूर्यलोकाभावेन[9] कीर्तितः ।
अलोकलोकयोर्मध्ये लोकालोको महाचलः ।
पञ्चाशल्लक्षविस्तारो सपञ्चाशत्सहस्रकः[10] ।
लक्षद्वयेनोच्छ्रितश्च वलयाकृतितः स्थितः ॥
लोकालोकात्तु परतो लोकात्तु द्विगुणं तमः ।

---

1. स्वतुल्यशुद्धोदकेन
2. 'समुद्रेण' - नास्ति - प्रा-1, प्रा-2
3. आवृतः - अ
4. षण्णवतिसंख्याका - प्रा-1, प्रा-2
5. पञ्च - अ
6. स्वपार्श्वदैः - प्रा-1, प्रा-2
7. लोकस्वनस्तये आस्ते - प्रा-1
8. तत्रालोक - प्रा-1, प्रा-2
9. सूर्यो लोकाभावेन - अ
10. काः - प्रा-1, प्रा-2

परतो द्विगुणं तस्माद् घनोदकमिति स्मृतम् ।
दध्याकारं जलं तत्तु नानाद्वीपसमावृतम्[1] ।
एषां मणिप्रकाशेन तमसो नास्ति संभवः ।
तत्पारे खर्परं यावदनन्तासनमुच्यते ।
लक्षत्रयं योजनानि[2] विस्तृता[3] वलयाकृतिः[4] ।
श्रीभूदुर्गात्मका[5] भागास्तत्रापि परितः स्थिताः[6] ।
इति विष्णुरहस्ये ।

[अनन्तासनविस्तारः]

अनन्तासनविस्तारः त्रिलक्षम्[7] । त्रिलक्षमध्ये[8] भूभागो लक्षः । श्रीभूभागयोर्मध्ये अरनामा सुधासमुद्रः[9] । अयुतयोजनविस्तृतः[10] । श्रीदुर्गाभागयोर्मध्ये ण्यनामा सुधा[11]समुद्रः अयुत[12]विस्तृतः ।

---

1. समाकुलं - अ
2. योजनानां - अ
3. विस्तृतं - प्रा-1, प्रा-2, अ
4. वलयाकृतिम् - अ
5. त्मिका - अ
6. स्थिता - प्रा-1
7. त्रिलक्षः - अ
8. 'त्रिलक्षमध्ये' - नास्ति - अ
9. सुधानदी - अ
10. अयुतविस्तृता - अ
11. 'सुधा'-नास्ति - अ
12. दशसहस्र - प्रा-1, प्रा-2

तत्र[1] श्रीभागे परमात्मनो गृहम् । तत्र द्वारादीनि श्वेतद्वीपवद् ज्ञेयानि[2] [मेरुत्रिकोटिप्रमाणं भवति ।][3] एतत् सर्वं लोकनामा[4] । एतस्माल्लोकशब्दवाच्याद्[5] द्विगुणम् अन्धतमः[6] । लक्षोनसप्तकोटियोजन-विस्तीर्णम्[7] । तमसो द्विगुणं घनोदकम् । द्विलक्षोनचतुर्दशकोटियोजन-विस्तीर्णम् । लोकालोकपर्वतः सपञ्चाशत्सहस्र[8] पञ्चाशल्लक्षविस्तृतः । अनन्तासनं त्रिलक्षम् । एवं मिलित्वा गणनायां मेरुमध्यमारभ्याण्ड-पर्यन्तं[9] पञ्चविंशतिकोटयो भवन्ति ।

ननु लोकालोकपर्वतस्य पञ्चाशत्सहस्राधिक'पञ्चाशल्लक्षविस्तृतत्व'[10] कथनं भागवतविरुद्धम् । तत्र पञ्चाशल्लक्षविस्तृतत्वस्यैव[11] कथनादिति चेन्न,

---

1. 'तत्र' - नास्ति - अ
2. ज्ञातव्यानि । - प्रा-1, प्रा-2
3. अस्मिन् स्थले अप्रतौ सर्वथा भिन्नः पाठः - मेरुमध्यमाभ्य पञ्चाशत्सहस्रोन-चतुःपञ्चाश[ल्ल]क्षाधिककोटिद्वययोजनं संख्याकाः सर्वद्वीपसमुद्रगाः पण्ण-वतियोजनविस्तीर्णं हैमस्थ एवं मिलित्वा पञ्चाशत्सहस्रोनसार्धकोटित्रयपरिमाणं भवति ।
4. सर्वलोकनामा - अ
5. वाच्या - प्रा-1, प्रा-2, अ
6. तमः - प्रा-1, प्रा-2
7. योजनानि विस्तीर्णं - प्रा-1, प्रा-2
8. 'पञ्चाशत्सहस्र' नास्ति - प्रा-1, प्रा-2
9. मेरुमारभ्याण्डपर्यन्तं - प्रा-1, प्रा-2
10. अस्मिन् भागे केवलं 'त्व' - प्रा-1, प्रा-2
11. विस्तृतस्यैव - अ

दशयोजनात् किञ्चिदधिकस्यापि ग्रामादेः अल्पत्वविवक्षया[1] दशयोजनादिव्यवहारस्य लोके दर्शनात् । पञ्चाशत्सहस्राधिकोऽपि[2] अल्पत्वविवक्षया पञ्चाशल्लक्षपरिमितत्वकथनं[3] संगच्छते ।

[अन्तरिक्षादिलोकवर्णनम्]

अतः[4] अन्तरिक्षलोकः लक्षयोजनोच्छ्रितः । कोटियोजनविस्तृतः । तत्र[5] सिद्धचारणादयः[6] भगवन्तमुपासते । भूलोकात् स्वर्गलोकः[7] अर्धकोट्युच्छ्रितः । कोटियोजनविस्तृतः । स्वर्गलोकदलं पञ्चाशत्सहस्रम् । तत्रेन्द्रः उपेन्द्रमुपास्ते ।

महर्लोकः स्वर्गात् पञ्चसप्ततिलक्षोच्छ्रितः पञ्चाशत्कोटिविस्तृतः । तद्दलम् एककोटिपञ्चविंशतिलक्षम्[8] । तत्र देवगन्धर्वा भगवन्तमुपासते ।

ततो[9] जनोलोकः[10] एककोटिद्वादशलक्षपञ्चाशत्सहस्रोन्नतः । पञ्चाशत्कोटिविस्तीर्णः । तद्दलम् एककोटिपञ्चाशल्लक्षम्[11] । तत्र पक्वसिद्धा भगवन्तमुपासते।

---

1. 'अल्पत्वविवक्षया' - नास्ति - प्रा-1, प्रा-2
2. केऽपि - अ
3. विस्तृतत्वकथनं
4. 'अतः' नास्ति - प्रा-1, प्रा-2
5. ततः - प्रा-1, प्रा-2
6. चारणभूतादयः - अ
7. स्वर्गः - प्रा-1, प्रा-2
8. लक्षः - अ
9. 'ततो' - नास्ति - अ
10. जनलोकः - प्रा-1, प्रा-2
11. लक्षः - अ

ततस्तपोलोकः [एककोटिपञ्चाशल्लक्षः । तद्दलम् एककोटिपञ्चाशल्लक्षम् । तत्र शिवः संकर्षणमुपास्ते ।] ततः सत्यलोकः । चतुःकोटिषड्लक्षपञ्चविंशत्[1]] (आवरणान्तर्गति भागे 'अ'प्रतौ एवमस्ति - 'एककोट्यष्टाधिकषष्टिलक्षपञ्चसप्तति') सहस्रोन्नतः । पञ्चाशत्कोटिविस्तीर्णः । तद्दलम् एककोटिपञ्चाशल्लक्षम्[2] । [तत्र शिवः संकर्षणमुपास्ते । ततः सत्यलोकः .... इत्यादि-'अ'][3]

तत्र ब्रह्मसदनम् । तन्मध्ये[4] विष्णुसदनम् । ब्रह्मसदनं परितः[5] अष्टदिक्पाल[6] ग्रहादीनि[7] मेरुपर्वतस्थब्रह्मसदनवद् ज्ञातव्यानि[8] तत्र दिक्पालकाद्यखिलदेवैः सभाजितो ब्रह्मा भगवन्तमुपास्ते । तदुपरि[9] वैकुण्ठलोकः । अष्टकोटिद्वादशलक्षपञ्चाशत्सहस्रोन्नतः तद्विस्तारः[10] ।

अष्टत्रिंशत्कोटि[11]संख्याकः । पूर्वपश्चिमयोर्दीर्घं यावद् अण्डकटाहपर्यन्तं पञ्चाशत् कोटयः । वैकुण्ठस्य[12] दक्षिणभागे भूभागः । नवकोटिसंख्याकः।

---

1. पल्लक्ष - प्रा-1, षट्लक्ष - प्रा-2
2. लक्षः - अ
3. आवरणचिह्नान्तर्गतो भागो व्यत्यस्तः - प्रा-1, प्रा-2
4. तत्र ब्रह्मसदनमध्ये - अ
5. ब्रह्मसदनपरितः - प्रा-2 ; अ, ब्रह्मसदनपरिमितः - प्रा-1
6. अष्टदिक्पालकादि - प्रा-1, प्रा-2
7. गृहादिनि - अ
8. मेरुसदनवद् द्रष्टव्यानि । - प्रा-1, प्रा-2
9. 'तदुपरि' नास्ति - प्रा-1, प्रा-2
10. वैकुण्ठ-विस्तारः । - प्रा-1, प्रा-2
11. त्रिंशकोटि - प्रा-1
12. कोटि वैकुण्ठे - अ

श्रीभूभागयोर्मध्ये अरनामा सुधासमुद्रः । द्विलक्षः मुक्तामुक्त-सेवितः । श्रीभागस्थितस्य[1] न नाशः । भूभागस्थितस्य नाशः ।

तदनन्तरं[2] श्रीभागः विंशत्कोटिसंख्याकः । ततो दुर्गाभागो नव-कोटिसंख्याकः[3] । श्रीदुर्गाभागयोर्मध्ये ण्यनामा सुधासमुद्रः । द्विलक्षः । मुक्तामुक्तसेवितः ।

वैकुण्ठदलं द्विकोटि-एकोनशतपञ्चाशत्सहस्रं[4] एवम् उन्नतेन सह दलानां[5] भूलोकमारभ्य उपरि अण्डखर्परपर्यन्तं[6] पञ्चविंशति[7]कोटयो भवन्ति ।

तत्र[8] वैकुण्ठे विष्णुसदनम्[9] । तत्र द्वारपालकाद्याः[10] श्वेतद्वीपवद् ज्ञातव्याः । तत्र वैकुण्ठनामा[11] भगवान् ब्रह्मादिभिर्मुक्तैः[12] सेव्यते ।

---

1. श्रीभागसथितसमुद्रस्य - प्रा-1, प्रा-2
2. मध्ये - अ
3. नवकोटिर्हि - अ
4. द्विकोटि-एकोनशतपल(ङ्क?)क्ष-पञ्चाशत्सहस्रम् - प्रा-1 ; द्विकोटि एकोनशत-पञ्चाशल्लक्षसहस्रम् - अ
5. दलगणने - प्रा-1, प्रा-2
6. अण्डपर्यन्तं
7. विंशत - प्रा-1, प्रा-2
8. 'तत्र' नास्ति - अ
9. वैकुण्ठविष्णुसदनम् ।
10. द्वारपालास्तु - प्रा-1, प्रा-2
11. वैकुण्ठनामक - अ
12. मुक्तब्रह्मादिभिः - अ

न वर्तते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं[1] न च कालविभ्रमः[2] । न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः ।

'श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः[3] सुपेशसः । सर्वे चतुर्बाहव उन्मि[4]षन्मणिप्रवेकनिष्काभरणाः सुवर्चसः' । भागवतम् (2.)।

योजनानां पञ्चविंशत्कोटयो मेरुपर्वतात् चतसृष्वपि दिक्षूर्ध्वमधश्चाण्डं प्रकीर्तितम् । ब्रह्माण्डान्तर्गतभूम्यपेक्षया ब्रह्माण्डखर्परं द्विगुणम् । शतकोटियोजनदलम् । पृथिव्यावरणमपि शतकोटिविस्तृतमेव । तद्दशगुणिता[5] आपः । एवमुत्तरत्रापि द्रष्टव्यम् ।

तदुक्तं श्रीमन्महाभारततात्पर्यनिर्णये[6] -

'अवग्नी[7]रनभोऽहंकृन्महत्तत्त्वगुणत्रयैः ।
क्रमाद् दशगुणैरेतैरावृतं[8] परितस्ततः[9] ।
व्याप्तोऽहं[10] सर्वगोऽनन्तोऽनन्तरूपो निरन्तरः' । इति ।
प्रकृतमनुसरामः[11] ।

---

1. मिश्रितं - अ
2. विभमः - प्रा-1 ; विक्रमः - अ
3. सुयशः - अ
4. उन्मी - प्रा-1
5. तद्दशगुणतः आपः - अ
6. तात्पर्यनिर्णये - प्रा-1, प्रा-2
7. अवग्नि - अ
8. दशगुणैरेतदावृतं - प्रा-1, प्रा-2
9. परतस्ततः - अ
10. व्याप्ताऽहं - अ
11. 'इति । प्रकृतमनुसरामः' - नास्ति - प्रा-1, प्रा-2

[ब्रह्माण्डप्रवेशः]

वासुदेवो देवैः प्रार्थितः सन् तेषाम्[1] आश्रयार्थम् एतादृशमावरण-सहितं[2] ब्रह्माण्डं 'निर्माय तस्मिन् प्रविवेश'[3] ।

ततो[4] ततो ब्रह्मादिकान् देवान्[5] देवांशानपि सर्वशः ।
निमील्य[6] प्रविवेशाथ महत्तत्त्वतनुं विधिम् ।
तमग्रसद्विधिं[7] विष्णुः सर्वजीवगणैर्युतम् ।
संसृष्टानि च भूतानि राशीभूतानि यानि च ।
तान्यपि स्वोदरे चक्रे सृष्टिं कर्तुं जगत्प्रभुः ।
अथो विवेश ब्रह्माण्डं लक्ष्म्या सह महेश्वरः ।
वैकुण्ठमाविशल्लोकं[8] तत्रापश्यन्निजाकृतिम्[9] ।
उपास्यमानाः संसारान्मुक्तैर्देवगणैः सह[10] ।
स ददर्श परावृत[11]प्रलयाग्निपयांस्यपि ।

---

1. एतेपाम् - प्रा-1, प्रा-2
2. एतादृशावरणसहितं - प्रा-1, प्रा-2
3. अत्र अप्रतौ - 'निर्ममे'- इत्येवमेव वर्तते ।
4. 'ततो' - नास्ति - प्रा-1, प्रा-2
5. ब्रह्माखिलान् जीवान् - प्रा-1, प्रा-2
6. निर्गत्य - अ
7. तमग्रसीदथो - प्रा-2 ; तमग्रसिदथो - प्रा-1
8. वैकुण्ठमादिशल्लोकं - प्रा-1, प्रा-2
9. तीः । - प्रा-1, प्रा-2
10. सदा । - प्रा-1, प्रा-2
11. सुदर्शनपरीवर्त - प्रा-1, प्रा-2

नैव[1] स्पृशन्ति यांल्लोकान्[2] शाश्वतास्ते[3] हि वैष्णवाः ।
[ब्रह्माण्डे जलपूर्णेऽपि जललेशोऽपि यत्र न ।
तादृशं रमणीयं तद् वैकुण्ठाख्यं परं पदम् ।
अतीत्याघः समागत्य शिश्ये श्रान्त इवाम्भसि ।
चतुर्युगशतं पश्चात् उन्निद्र इव चाभवत् ।
ससर्ज मारुतं वक्त्रात् सोऽशोषयदपोऽखिलाः ।
स हि सत्त्वात्मको[4] वायुः लक्ष्म्या रूपं न चापरः ।
श्वेतद्वीपमथागत्य चिरं चिक्रीड तत्र सः ।
ततोऽन्धतम आगत्य ददृशे पापिनोऽखिलान् ।
सदा सर्वेन्द्रियैः कष्टं भुञ्जानान् द्वेषतत्परान् ।
ततोऽनन्तासनं गत्वा विचचार निजेच्छया ।
रममाणः कियत्कालं पुनर्वैकुण्ठमागमत् ।
यावद् वैकुण्ठमभवद् ब्रह्माण्डं जलपूरितम् ।
सुष्वाप सलिले तत्र सर्वदाऽऽनन्दविग्रहः ।
संलालयन्ती तत्रासीत् तत्पादौ कमला सती ।
पुनर्मारुत उत्पाद्य शोषयित्वाऽखिलं जलम् ।

[प्रकृत्या जगदुत्पत्तिः]

प्रकृत्योत्पादयामास त्रीन् गुणांश्च ततो महत् ।

---

1. नयं - अ
2. यं लोक - अ
3. शश्वतास्ते - प्रा-1
4. स.वात्मिको - प्रा-1

महतोऽहंकृतिस्तस्याः मनोबुद्ध्यादिकान् हरिः ।
प्रादुश्चक्रे च संसृष्टं यदाकाशं बहिःकृतिम् ।
ततो वायुं ततो वह्निं तत आपो भुवं ततः ।
त्रिवृद्राशित्रयं वायोरपि राशिं व्यदर्शयत् ।
अथ तन्नाभितो जज्ञे कल्पादौ पद्ममद्भुतम् ।
पद्मनाभोऽभवत् कल्पः परार्धान्ते विधेस्तु सः ।
स विष्णुः पद्मनाभाख्यः तन्नाभिकमलादभूत् ।
हिरण्यगर्भनामाऽसौ स जातो ददृशे दिशः[1] ।
चतुर्दिक्षु च चत्वारि मुखान्यासन् महात्मनः ।
ऊर्ध्वं प्रपश्यतस्तस्य हयाकारमभून्मुखम् ।
दण्डं कमण्डलुं[2] चाक्षमालां चैव प्रबोधिनीम् ।
दधानं च चतुर्हस्तं गले यज्ञोपवीतकम् ।
पद्मस्य कर्णिकामध्ये निषण्णं स्वस्तिकासने ।
शुद्धवासोद्वयधरं वीक्षाञ्चक्रेऽङ्गमात्मनः ।
तदा विष्ण्वाज्ञया दुर्गा जलबिन्दुभिरन्वितम् ।
विससर्ज महावातं तेनाभूत् पीडितो विधिः।][3]
तदा गाढान्धकारे स्वमसहायं विलोक्य सः[4] ।
पीड्यमानो वर्षवातैः क्षणं भीतोऽस्मरद्धरिम् ।

1. दृशः - प्रा-1
2. कमण्डुलं - प्रा-1
3. आवरणचिह्नान्तर्गतो बृहद्भागः नास्ति - अ
4. तदा गाढान्धकारैश्च असहायं - अ

ततस्तस्य तपोऽत्यासीदशरीरैव वागपि[1] ।
समाधियोगमास्थाय[2] निरुच्छ्वासो[3]ऽभवत्ततः ।
दिव्यवर्षायुतं पश्चादुत्थितः स समाधितः ।
प्रीतोऽथ तपसा तेन पद्मनाभो हरिः स्वयम् ।
कौमारं रूपमास्थाय निजं रूपमदर्शयत् ।
तदा हिरण्यगर्भोऽसौ वीक्ष्य तं सहसोत्थितः ।
प्रणतः[4] पादयोस्तस्य तेन चोत्थापितः पुनः[5] ।
बद्धाञ्जलिपुटस्तस्थौ वीक्ष्य तन्मुखपङ्कजम् ।
उपादिशत्ततो वेदान् साङ्गान्[6] सूत्राणि चागमान् ।
पञ्चरात्रमुखांस्तस्मै ततोऽन्तर्धानमाप्तवान् ।
अधीताध्ययनं कुर्वन् तस्थौ वर्षसहस्रकम्[7] ।
मत्वाऽथ शक्तमात्मानं[8] विश्वसृष्टौ मनो दधे ।

---

1. ततस्तपतस्तत्पासी-दशरीरैव वाक्तदा - प्रा-2,
ततस्तपतपोऽत्यासीदशरीरैव वाक्तदा - प्रा-1,
ततस्तपतपत्यासीत् (?) अशरीरैव वागपि । - अ
2. स्थायं - प्रा-2
3. निरस्थासो - प्रा-1
4. पपात - अ
5. पुरः - अ
6. 'वेदान् साङ्गान्' एप भागस्त्रुटितः - प्रा-1
7. सहस्रकान् - अ
8. 'नं' - नास्ति - अ

[ब्रह्मकृता सृष्टिः]

अवर्धयत्[1] ततो[2]पद्मं अधोमूलं सुविस्तृम्[3] ।
अण्डखर्परमारभ्य यावद् वैकुण्ठमूलकम् ।
ववृधे ककुभो व्याप्य विश्वस्थित्यै चतुर्दश[4] ।
भुवनान्यसृजत्तत्र भूमेस्तु बिलसप्तकम् ।
भूर्भुवः स्वर्महर्लोकजनोलोकस्तपस्ततः[5] ।
सत्य इत्येव च प्राहु[6]र्भुवनानि चतुर्दश ।
तदाधारार्थमभवत् वैराजं देहमात्मनः ।
महदाद्यखिलैस्तत्त्वैर्निर्मितं विश्वतोमुखम् ।
तत्रैव विदधे[7] सर्वान् जीवान् देवादिकानपि[8] ।
विधाय पौरुषं रूपं भगवांस्तत्र चाविशत् ।
पादयोर्भूमिलोकश्च[9] भुवर्लोकस्तु नाभितः ।
स्वर्लोको हृदये चास्य महर्लोकस्तु जत्रुणि ।

---

1. 'अवर्धयत्' नास्ति - प्रा-2, आवर्धयत् - चेन्नै
2. चतो - प्रा-1, प्रा-2
3. कुर्वन्तो ध्रुवमूलं सुविस्तृतम् । - प्रा-1, प्रा-2
4. चतुर्दिशम् - अ
5. स्तथा - अ
6. सप्तलोक इति प्राहु - प्रा-1, प्रा-2
7. निदधे - प्रा-1, प्रा-2
8. देवांशकानपि । - प्रा-2, प्रा-2
9. भूमिलोपोऽभूद् - प्रा-1, प्रा-2

जनोलोकोऽस्य[1] कण्ठेऽभूत्तपः सत्यं शिरस्स्थितम्[2] ।
सोऽसृजत् प्रथमं प्राणाद्वायुं वाचं[3] सरस्वतीम् ।
त्रिविधाहंकृते रुद्रं त्रिरूपमसृजत् ततः ।
देवीमुमां[4] व्यधाद् बुद्धेः[5] इन्द्रं च मनसाऽसृजत् ।
प्रद्युम्नं चानिरुद्धं च गुरुं शुक्रं[6] शचीं मनुम् ।
दक्षं चन्द्रमसं चान्यान् वसिष्ठप्रमुखान् मुनीन् ।
देवर्षीन् नारदादींश्च[7] मानसादेव सृष्टवान् ।
दिग्देवाः श्रोत्रतो[8] नेत्राद् रविरग्निर्मुखादभूत् ।
वर्णश्रेष्ठोऽभवद् ब्रह्मा मुखाद् देवस्य वेधसः ।
क्षत्रदेवोऽभवद् बाह्वो[9] रूर्वोर्वैश्यादिदेवताः ।
शूद्रवर्णोऽ[10]भवत्पद्भ्यां[11] धर्म आसीत् स्तनान्तरात् ।

---

1. जनोलोकस्तु - अ
2. सत्यं शिरसि संस्थितम् - अ
3. वाचः - प्रा-1, प्रा-2
4. देवीउमां - प्रा-1, प्रा-2
5. बुद्धिम् - प्रा-1, प्रा-2
6. शक्रं - प्रा-1, प्रा-2
7. नारदींश्च - प्रा-1
8. 'तो'- नास्ति-अ
9. वायो - अ
10. र्णा - अ
11. ऽभवत्पद्भ्यः - प्रा-1

जिह्वाग्राद् वरुणो[1] जज्ञे नासिकाभ्यां तथाऽश्विनौ ।
गणपो धनपो रुद्राः आदित्या[2]वसवोऽखिलाः ।
मरुतो देवगन्धर्वाः मनुष्याः पितरस्तथा[3] ।
निर्ऋतिर्नैर्ऋतो यक्षा[4] विद्याधरमहोरगाः ।
सर्वाङ्गेभ्योऽथ रोमभ्यो[5] नखेभ्यो जज्ञिरेऽ[6]खिलाः ।
एवं देवगणाः सृष्टास्तात्त्विकाश्चाप्यतात्त्विकाः ।

[मुख्यप्राणः ज्येष्ठः श्रेष्ठश्च]

तेषु ये तात्त्विका देवाः[7] ते पस्पृधुर्मिथोऽखिलाः[8] ।
अहं श्रेष्ठस्त्वहं श्रेष्ठ इति, [तान् अवदद् विधिः ।
यस्मिन् गत इदं देहं पतेद्यस्य प्रवेशतः ।
उदतिष्ठेत्[9] स हि श्रेष्ठः][10] किं वृथा जल्पनेन वः?[11]

---

1. वरुणा - प्रा-1
2. आदित्य - प्रा-1, प्रा-2
3. मानुषाः पशवस्तथा - अ
4. नैर्ऋतो निर्ऋतिर्यक्षा - अ
5. रोमेभ्यः - प्रा-1, प्रा-2
6. जिज्ञिरे - प्रा-1
7. देवताः - प्रा-1
8. ते पराथमथोऽखिलाः - प्रा-1
9. उ.ष्ठिः - प्रा-2
10. आवरणचिह्नान्तर्गतो भागः नास्ति - अ
11. बल्पनेन वा? - अ ; 'स हि श्रेष्ठः'नास्ति - प्रा-2

अथ प्राणोऽवदत् तान् वै यूयं सर्वेऽपि गच्छथ[1]
क्रमेण युगपद् वाऽपि कस्य याने[2] पतत्ययम् ।
पश्याम इति ते जग्मुः देहो नैवापतत्ततः ।
अथ प्राणे बहिर्याति क्षणाद्देहोऽपतद्भुवि ।
दृढनिर्णयकामास्ते पुनरेव बभाषिरे ।
यत्प्रवेशादयं देहः[3] उत्तिष्ठेत् स वरो भवेत् ।
इत्याविशन् पुनस्तत्र क्रमेण युगपच्च ते ।
नोत्तस्थावथ तत्रैव प्राणे विष्टे समुत्थितः[4] । उत्थितो[5]
[ततः क्षमापयित्वा ते प्राणं श्रेष्ठमचीक्लृपन् ।
मरुद्भिः सह स प्राणः स्थितः सर्वेषु वर्ष्मसु ।
धत्ते व्यापारयत्येष द्विषतां मारयत्ययम् ।][6]
निर्गमादुदितो[7] देहो दधार भुवनान्यसौ ।
हयवक्त्रसमं यत्तु पञ्चमं वेधसो मुखम् ।
दुः[8] शब्दमकरोत् तेन लक्ष्मीरुद्वेगमप्युत ।

---

1. वाञ्छथ । - प्रा-1, प्रा-2
2. जाने - प्रा-1
3. यत्प्रवेशायदं देहः - प्रा-1
4. समुस्थितः- प्रा-1
5. उस्थितो - प्रा-1
6. आवरणचिह्नान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
7. व्रह्मणो - प्रा-1, प्रा-2
8. उ - प्रा-1, प्रा-2

धनुर्दत्वा च बाणं च[1] रुद्रमाज्ञापयत् तदा ।
छिन्धि शीर्षमिदं धातुः स तथैव तथाऽकरोत् ।
ज्वलत्कालानलसमं तन्मुखं रुद्रमाद्रवत् ।
भीतोऽथ शरणं प्राप लक्ष्मीं रुद्रोऽथ विह्वलः[2] ।
सा तत्करे कपालं तत्[3] दत्वा विष्णुपदाम्बुभिः[4] ।
क्षमयामास तत्पापं धौत[5]पाप्मा ततोऽभवत् ।
अन्ये तु प्राणिनः सृष्टास्त्रिवृद्राशिभिरेव हि[6] ।
विधाता तैजसान् देवान्[7] पार्थिवेन तु मानवान् ।
तथा[8]ऽन्यानखिलान् जन्तून् वारुणान्[9] जलराशितः ।
भूतप्रेतपिशाचादीन् वायवीयेन[10] राशिना ।
वायुभागातिरेकश्च निक्षिप्तः पक्षिवृन्दके ।
तेनोपप्लवने[11] प्रदृश्यन्ते वियच्चराः ।

---

1. जणं च - प्रा-1
2. पिप्पलः । - प्रा-1, प्रा-2
3. तु - अ
4. धिः । - प्रा-1, प्रा-2
5. धूत - अ
6. वा - अ
7. धाता वै तैजसाद्देवान् - प्रा-1, प्रा-2
8. धाता - प्रा-1, प्रा-2
9. वारुणाञ्ज - अ
10. वायव्येन तु - अ
11. तेनाप्लवनशक्तास्ते - प्रा-1, प्रा-2

एवं सृष्टिरभूत् तस्मिन् पाद्मकल्पे[1] स्वयंभुवः ।

एवं पाद्मकल्पे स्थूलसृष्टिः[2] -

[श्वेतवराहकल्पः]

एवमाद्ये[3] विधेयेऽति[4] परार्धे पाद्मकल्पतः ।

द्वितीयस्य[5] परार्धस्य प्रथमः कल्प उच्यते ।

कल्पश्वेतवराहाख्यः संक्षेपाद् वर्ण्यते पुनः[6] ।

[लयोदके मग्नायाः धराया उद्धारः]

आद्य[7]कल्पादिमे काले मग्नां वीक्ष्य जले भुवम् ।

कुत्र स्रक्ष्यामि भूतानीत्येवं चिन्तासमाकुलः ।

चतुर्मुखस्तु सस्मार पद्मनाभं महाप्रभुम् ।

स्मृतस्स जगृहे रूपं श्वेतवाराहनामकम् ।

ततो यज्ञवराहोऽसौ निमज्ज्यात्र महाजले ।

---

1. पाद्मकल्पे तस्मिन् - प्रा-1, प्रा-2
2. स्थूलतरसृष्टिः - प्रा-1, प्रा-2
3. एवमाद्य - प्रा-1, एवं भाद्य - प्रा-2
4. विधेर्याते - प्रा-1, प्रा-2
5. 'द्विती'- नास्ति - प्रा-1, प्रा-2
6. अत्र 'पुनः' इत्यनन्तरं 'धुना'इति वर्तते - अ । प्रायशः लिपिकरेण अत्र 'अधुना' इति पाठान्तरं दृष्टवता भाव्यम् । तस्मात् तस्यापि योजनमत्र कृतवता भाव्यम् । ; कल्पश्वेतवराहस्य संक्षेपाद् वर्णयामि ते । - प्रा-1 प्रा-2
7. अथ - अ

मग्नां भुवं स्वदशने[1] निधायो[2]द्धर्तुमैच्छत ।
तदा हिरण्यगर्भस्य नासाश्वासाद्[3] विनिःसृतः ।
हिरण्याक्षो महारौद्रः सोऽपि तस्मिन् महाजले ।
निमज्य रुरुधे यज्ञवराहं[4] सुमहाबलः ।
जघ्ने दंष्ट्रैकदेशेन क्रोडरूपो महाप्रभुः ।
पूर्ववत् स्थापयामास महीं[5] सृष्ट्यर्थमेव हि ।

[चतुर्मुखकृता मानस-दैहिकसृष्टिः]

ब्रह्माऽथ ससृजे पूर्वं मनसा सनकादिकान् ।
आज्ञापितास्तु ते[6] सृष्टौ नैच्छन् ब्रह्मपरायणाः ।
नियोगाकारणात् तस्य[7] जज्वाल कुपितो विधिः ।
ता[8]नौचित्याच्छशापैतान् ततो भ्रूमध्यतः सृतः ।
कालानलसमप्रख्यः रौद्रो रुद्र इतीरितः ।
कोपाग्निमेकधा कृत्वा ललाटे नयनं व्यधात् ।
अथासृजद् ऋषीन् सप्त मरीचिर्भृगुरङ्गिराः ।

1. स्वदंष्ट्रेण - अ
2. विधायो - अ
3. नासास्वा - प्रा-1
4. वाराहं - अ
5. वहिः - अ
6. आज्ञापितास्तेन - अ
7. नियोगाकरणास्त्वस्य - अ
8. ना - अ

क्रतुः पुलस्त्यः पुलहो[1] वशिष्ठस्तेषु सप्तमः ।
दक्षिणाङ्गुष्ठतो दक्षं नारदं चापि मानसम् ।
कृतेऽप्येवं यदा नासीत्[2] सृष्टिप्राचुर्यमेधयत्[3] ।

[मन्वन्तरसृष्टिः]

तदा दक्षिणभागेन सृष्टः स्वायम्भुवो मनुः ।
वामेन शतरूपा च नारी परमसुन्दरी ।
तदानीं मनवे प्रादात्[4] ब्रह्मा सृष्टिविधित्सया ।
अथ तस्यां मनुः पुत्रौ[5] द्वावेव[6] समजीजनत् ।
प्रियव्रतं तथोत्तानपादं[7] कन्यात्रयं तथा ।
आकूतिर्देवहूतिश्च प्रसूतिरिति विश्रुताः ।
तथैव[8] जज्ञतुर्धातुः मनसा[9] रुचिकर्दमौ ।
आकूतिं रुचये प्रादाद् दक्षाय प्रियसूतिकाम्[10] ।

---

1. पुलह - अ
2. नासौ - अ
3. मेव यत् - प्रा-1, प्रा-2
4. प्राह - प्रा-1, प्रा-2
5. पुत्रो - प्रा-2, प्रौ - प्रा-1
6. द्ववेव - प्रा-1
7. प्रियव्रतस्ततो.ाानपादः - प्रा-1, प्रा-2
8. तदैव - प्रा-1 प्रा-2
9. मानसौ - प्रा-1 प्रा-2
10. दक्षायापि प्रसूतिकाम् - अ

देवहूतिं कर्दमाय कृतकृत्योऽभवन्मनुः ।
मरीचेः कश्यपो जज्ञे चराचरमभूत् ततः ।
आकूत्यां रुचितो जज्ञे युग्मं यज्ञश्च दक्षिणा ।
नारायणश्च लक्ष्मीश्च तावुभौ दम्पती तदा[1] ।
देवहूत्यां कर्दमेन जज्ञे[2] स[3] कपिलो मुनिः ।
सोऽपि नारायणः साक्षाद्योऽशिक्षन्मातरानजाम्[4] ।
स्वायम्भुवेऽन्तरे ह्यस्मिन्[5] यज्ञ इन्द्रमशात् परम्[6] ।
स्वारोचिषो[7] मनुर्नाम द्वितीयोऽग्नेः स्वतो महान् ।
द्युमत्सुषेणरोचिष्मत्प्रमुखा[8]स्तस्य चात्मजाः ।
ऋषिर्वेदशिरा[9] नाम तुषिता तस्य पत्न्यभूत् ।
तस्यां रोचननामासीज्ज्येष्ठ[10] इन्द्रश्च सोऽभवत् ।
यः पुरा सूत्रनामाऽऽसीत् स एवायमिहाभवत् ।

---

1. तथा - अ
2. जातः - प्रा-1 प्रा-2
3. जातो स - प्रा-1, प्रा-2
4. मातरेनिजम् - अ
5. त्यस्मिन् - प्रा-2
6. ऐन्द्रमदाघहम् - प्रा-1 प्रा-2
7. स्वरोचिषो - प्रा-1 प्रा-2
8. रोचिष्म - प्रा-1, रोचिष्मा - प्रा-2
9. शिरो - प्रा-2, चेन्नै
10. न्यष्ट - प्रा-1 प्रा-2

तस्मादनन्तबाहुर्वै अवतीर्णो हरिः[1] स्वयम् ।
उपेन्द्र इति नामाऽसौ सर्वधर्मप्रवर्तकः[2] ।
तृतीय उत्तमो नाम प्रियव्रतसुतो मनुः ।
य[ः] स्तनादभवद्विष्णोः स धर्मोऽत्रेन्द्रतां[3] गतः ।
सत्यजिन्नाम विख्यातो यस्माज्ञातो[4] हरिः स्वयम् ।
धर्मस्य सूनृतायां तु भगवान् पुरुषोत्तमः ।
सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह[5] ।
चतुर्थस्तापसो नाम ह्युत्तमस्यानुजो मनुः ।
स्वयमेव हि यो विष्णोर्लीलया मनुतां[6] गतः ।
तस्य ते तनया जाताः ऋष[7]ख्यात्यादयो दश ।
नासत्योऽत्रिशिखो[8] नाम्ना प्राप्त ऐन्द्रपदं ततः ।
हरिमेधा ऋषिर्नाम तस्य स्त्री हरिणी सती ।
तस्यां[9] जज्ञे हरिः साक्षात् तापसो[10] नाम वै स्वयम् ।

---

1. विभुः - अ
2. प्रदर्शकः - अ
3. इन्द्रता - अ
4. ज्ञाता - प्रा-1
5. 'हरिः स्वयम् । धर्मस्य सूनृतायां तु भगवान् पुरुषो.ामः । सत्यसेन इति ख्यातो जातः सत्यव्रतैः सह' एष भागः नास्ति - प्रा-2
6. मनुताः - प्रा-1
7. वृष - अ
8. विशिपो - प्रा-1 प्रा-2
9. तस्या - प्रा-1
10. तापसा - प्रा-1 प्रा-2

गजेन्द्रं मोचयामास ग्राहग्रस्तं[1] स्वभक्तकम् ।
पञ्चमो रैवतो नाम मनु[2]स्तापससोदरः ।
दस्र[3] इन्द्रो विभुर्नाम मनुपुत्रार्जुनादयः ।
पत्नी विकुण्ठा शुभ्रस्य सासूत[4] परमं हरिम्[5] ।
तयोः स्वकलया जज्ञे वैकुण्ठो भगवान् स्वयम् ।
षष्ठश्च चक्षुषः पुत्रः चाक्षुषो नाम वै मनुः ।
इन्द्रो[6] मन्द्रद्युम्नस्तत्र साक्षादिन्द्रश्च स स्मृतः ।
तत्रापि देवः संभूत्यां वैराजस्या[7]भवत् सुतः[8] ।
अजितो नाम भगवान् अंशेन जगतीपतिः[9] ।
पयोऽब्धिर्येन निर्मथ्य सुराणां[10] साधिता सुधा ।
भ्रममाणोऽम्भसि द्रुतः कूर्मरूपेण मन्दरः ।
मनुर्विवस्वतः पुत्रः श्राद्धदेव इति श्रुतः ।

---

1. ग्राहग्रस्त - अ
2. मम नु - प्रा-1
3. दश्व - प्रा-1
4. सासूता - प्रा-1
5. हरिमव्ययम् - अ
6. इन्द्रौथ - अ
7. वनादस्या - प्रा-1
8. वैरानस्याभवत् सुतः - प्रा-2
9. जगतः पतिः - अ
10. द्युनद्यां - प्रा-1 प्रा-2

सप्तमो वर्तमानो यस्तदपत्यानि मे श्रुणु ।
इक्ष्वाकुश्च नभश्चैव दृतिः[1] शर्यातिरेव च ।
इत्याद्या वैवस्वतमनो[2]र्दश पुत्रा बभूविरे ।
अन्तरे[3] वैवस्वतमनोः साक्षादिन्द्रः पुरन्दरः ।
कश्यपोऽत्रिर्वसिष्ठश्च विश्वामित्रश्च[4] गौतमः ।
जमदग्निर्भरद्वाज इति सप्तर्षयः स्मृताः[5] ।
तत्रापि[6] भगवज्जन्म कश्यपाददितेरभूत्[7] ।
आदित्यानामवरजो विष्णुर्वामनरूपधृत्[8] ।
संक्षेपतो मयोक्तानि सप्त मन्वन्तराणि ते ।
भविष्याण्यथ वक्ष्यामि विष्णोः शक्त्यन्वितानि च ।
वैवस्वतादष्टमस्तु[9] सावर्णी भविता मनुः ।
तस्मिन् विरोचनसुतो बलिरिन्द्रो भविष्यति ।
दत्वेदं[10] याचमानाय विष्णवे यः पदत्रयम् ।

---

1. दृष्टः - प्रा-1 प्रा-2
2. मेनो - प्रा-2
3. अनन्तरे - प्रा-1 प्रा-2
4. मित्रोऽथ - अ
5. सप्तैते ऋषयः स्मृताः - अ
6. अत्रापि - अ
7. कश्यपादचितेररूत् - प्रा-1
8. धृक् - अ
9. वैवस्वतो अष्टमस्तु - प्रा-1, प्रा-2
10. दत्वेमं - प्रा-1 प्रा-2, दत्वेमां - अ

लब्ध[1]मिन्द्रपदं हित्वा[2] ततः सिद्धिमवाप्स्यसि ।
नवमो दक्षसावर्णिर्मनुर्वरुणसंभवः ।
तत्रेन्द्रोऽद्भुतनामाऽसौ भविष्यति हरिप्रियः ।
आयुष्मतोऽम्बुधारायां ऋषभो भगवान् किल ।
भविता[3] तेन[4] संप्राप्तो[5] त्रिलोकीं भोक्ष्यते ततः[6] ।
दशमो ब्रह्मसावर्णिरुपश्लोकसुतो[7] महान् ।
तत्रेन्द्रः शम्भुनामाऽऽस्ते स्वर्गपालो महाप्रभुः ।
तत्रापि जन्म भविता हरेर्विश्वसृजां गृहे[8] ।
श्रीमूर्तिरिति विख्यातो येनाप्यायेत[9] वै जगत् ।
मनुर्वै धर्मसावर्णिरिका[10]दशम आत्मवान् ।
इन्द्रश्च वैधृतिस्तेषाम्[11] ऋषयश्चारुणादयः[12] ।

---

1. राध्र(?) - अ
2. त्यक्त्वा - अ
3. भविते - प्रा-1
4. येन - अ
5. संत्रातो - अ
6. भोक्ष्यतेऽद्भुतः - अ
7. रूपं श्लोकसुता - अ
8. ग्रहे - प्रा-1
9. .[illegible] - अ
10. रेको - अ
11. स्तत्र - अ
12. श्चारणादयः - अ

आर्यकस्य सुतस्तत्र धर्मसेतुरिति स्मृतः ।
वैधृतायां हरेरंशस्त्रिलोकान्[1] धारयिष्यति ।
भविता मेरुसावर्णी[2] राजन् द्वादशमो मनुः ।
ऋतुधामा च तत्रेन्द्रः विष्णुभक्तिपरायणः ।
स्वधामाख्यो हरेरंशः साधयिष्यति तन्मनोः ।
अन्तरं[3] सत्यमहसः[4] सूनृतायाः[5] सुतो विभुः ।
मनुस्त्रयोदशो भाव्यो देवसावर्णिरात्मवान् ।
दिवस्पतिश्च तत्रेन्द्रः स तु स्वर्गाधिपो महान् ।
देवहोत्रस्य तनया उपहर्ता बृहस्पतेः ।
योगेश्वरो[6] हरेरंशो बृहत्यां संभविष्यति ।
मनुर्वा इन्द्रसावर्णिश्चतुर्दशम एष्यति ।
तस्मिन् मन्वन्तरे ब्रह्मन् शुचिरिन्द्रो भविष्यति ।
नारायणस्य तनयो बृहद्भानुस्तथा हरिः ।
विनतायां[7] महाराज[8] क्रियातन्तुवितानितः[9] ।

---

1. हरेर्जन्म त्रिलोकीं - अ
2. वर्णिः - प्रा-2, चेन्नै
3. सप्तमा - प्रा-1, प्रा-2
4. सप्तमोहंसः - प्रा-1, प्रा-2
5. सुवृतायां - प्रा-1, प्रा-2
6. योगीश्वरो - अ
7. विनुतायां - अ
8. महाराजन् - प्रा-1, प्रा-2
9. वितानिताः प्रा-2 ; क्रियातन्तुवितन्वता - अ

राजंश्चतुर्दशैतानि[1] त्रिकालानुगतानि ते ।
प्रोक्तान्येभिर्मितः[2] कल्पो युगसाहस्रपर्ययः[3] ।

[जीवसृष्टिः]

जीवसृष्टिप्रकारश्च संक्षेपेणैव कथ्यते[4] ।
[आक्षिप्तामिन्द्रियस्त्रीणामसतीनां च मायया ।
रहोरचितयाऽऽलापैः शिशूनां कलभाषणैः ।][5]
गेहेषु[6] कूटधर्मेषु दुःखतन्त्रेष्वतन्द्रितः ।
कुर्वन् दुःखप्रतीकारं सुखवन्मन्यते गृही ।
न तथाऽस्य[7] भवेत् क्लेशो बन्धश्चापि[8] प्रसंगतः ।
योषित्संगाद् यथा पुंसस्तथा[9] तत्संगिसंगतः[10] ।
[दृष्ट्वा स्त्रियं देवमायां तद्भावैरजितेन्द्रियः ।
प्रलोभितः पतत्यन्धे तमस्यज्ञो पतङ्गवत् ।][11]

---

1. राजन चतुर्दशेतानि - प्रा-1, राजध्व चतुर्दशेतानि - प्रा-2
2. र्मनुः - प्रा-1, प्रा-2
3. पर्यतः - प्रा-2
4. जीवसृष्टिप्रकारः संक्षेपेण कथ्यते । श्रीः । - प्रा-1, प्रा-2
5. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
6. गुणेषु - प्रा-1, प्रा-2
7. तु - अ
8. श्चान्य - अ
9. पुंसा तथा - प्रा-1, पुंसो तथा - प्रा-2
10. तत्संगसगतेः - अ
11. आवरणचिह्नाङ्कितो भागः नास्ति - प्रा-1 प्रा-2

कुटुम्बभरणाकल्पो मन्दभाग्यो वृथोद्यमः ।
जरयोपात्तवैरूप्यो[1] परार्धे कुरुते स्पृहाम् ।
कास[2]श्वासकृतायासो कफ[3] संरुद्धनासिकः ।
वाच्यमानोऽपि न ब्रूते कालपाशवशं गतः ।
यमदूतौ तदा प्राप्तौ भीमौ सरभसक्षणौ[4] ।
स दृष्ट्वा तत्र हृदयः शकृन्मूत्रं[5] च मुञ्चति[6] ।
यातनादेहमावृत्य पाशैर्बद्ध्वा गले बलात् ।
नीयते दीर्घमध्वानं दण्ड्यं राजभटा यथा ।
क्षुत्तृट्परीतोऽर्कदवानलानिलैः संतप्यमानः पति-(परि?)तप्तवालुके[7]।
कृच्छ्रेण पृष्ठे कशया च ताडितश्चलत्यशक्तोऽपि[8] निराश्रयोदके ।
योजनानां सहस्राणि नवतिश्च नवाधिका[9] ।
त्रिभिर्मुहूर्तैर्द्वाभ्यां वा दिनैर्दशभिरेव च[10] ।

---

1. वैरूपो - प्रा-1 प्रा-2
2. खास - प्रा-1
3. खप - प्रा-1
4. सरभसेक्षणौ - अ
5. सकृन्मूत्रं - प्रा-1
6. विमुञ्चति - अ
7. वालुकैः - अ
8. ताडितो चलत्यशक्तोऽपि - प्रा-1 प्रा-2
9. नवाधिकः - प्रा-1, प्रा-2
10. वा - अ

पक्षान्मासेन वा याति यमलोकमितो मृतः[1] ।
अधस्तान्नरलोकस्य यावतीर्यातनाः स्मृताः[2] ।
क्रमशः समनुप्राप्य[3] पुनरत्राव्रजेच्छुचिः ।
कर्मणा[4] दैवतन्त्रेण जन्तुर्देहोपपत्तये ।
योनिं स्त्रियाः[5] संप्रविष्टः[6] पुंसो रेतःकणाश्रयः ।
कलिलं त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम् ।
दशाहेन तु पिण्डः स्यात् पक्षेण कठिनं भवेत् ।
मासेन तु शिरो द्वाभ्यां बाह्वङ्घ्र्याद्यङ्गविग्रहः[7] ।
नखलोमा[8] स्थिचर्माणि लिङ्गच्छिद्रोद्भवस्त्रिभिः[9] ।
चतुर्भिर्धातवः सप्त पञ्चभिः क्षुत्तृड्डुद्भवः[10] ।
षड्भिर्जरायुणा वीतः कुक्षौ भ्रमति[11] दक्षिणे ।

---

1. गतः - प्रा-1, प्रा-2
2. स्तु ताः - प्रा-1, प्रा-2
3. समनुक्रम्य - अ
4. 'णा'- नास्ति - अ
5. स्त्रियः - प्रा-1
6. स्त्रियः प्रविष्ट उदरं - अ
7. विग्रहम् - अ
8. रोमा - अ
9. भवेत् त्रिभिः । - प्रा-1 प्रा-2
10. पञ्चभिक्षुत्रिड्डुद्भवः - प्रा-1, तृड्भवाः - प्रा-2
11. भमति - अ .

सप्तमे जन्मकर्माणि गतानि स्मरते ऋषिः ।
कटुतीक्ष्णोष्णलवणक्षाराम्लादिभिरुल्बणैः ।
मातृभुक्तैरुपस्पृष्टः[1] सर्वाङ्ग[2] स्थितवेदनः[3] ।
कृमिभिः क्षतसर्वाङ्गः[4] भुग्न[5]पृष्ठशिरोधरः ।
शेते विण्मूत्रयोर्गर्ते[6] पूर्वकर्माण्यनुस्मरन्[7]
तत्र लब्धस्मृतिर्दैवात् कर्मजन्म[8]शतोद्भवम् ।
स्मरंस्तुवीत[9] तं वाचा येनायमुदरेऽर्पितः ।

जीव उवाच-

तस्योपसन्नमवितुर्जगदिच्छया त[10] -
ल्लीलातनोर्भुवि लसच्चरणारविन्दम्[11] ।
सोऽहं व्रजामि शरणं ह्यकुतोभयं[12] मे

---

1. स्पृष्टे - अ
2. सर्वाङ्गो - प्रा-1
3. छितवेदनः-अ 'स्थितवेदनः' इति नास्ति - प्रा-2
4. कृमिभक्षितसर्वाङ्गो - अ
5. अग्र - प्रा-2
6. गर्भी - प्रा-2, गर्ती - अ, गर्भि - प्रा-1
7. पूर्वकर्ममनुस्मरन् । - प्रा-1, प्रा-2
8. जन्मकर्म - अ
9. स्तुवित - अ
10. तस्योपसन्नमपि दैवात्कर्म ज रादिछया त - प्रा-2
11. भुवि विलसच्चरणारविन्दम् । - प्रा-1
12. न कुतोभयं - प्रा-1 प्रा-2

येनेदृशी गतिरभूदसतोऽनुरूपा[1] ।

एवं स्तुवन्तं तं जीवं गर्भे पूर्णे तु कालतः ।

प्रद्युम्नप्रेरितः शीघ्रं निर्यातयति[2] मारुतः ।

योनिं शोधयते तत्र वासुदेवाभिधो हरिः ।

रेतः सिञ्चति तत्रैषः प्रद्युम्नो हि प्रजापतिः[3] ।

त्वष्टा संकर्षणस्तत्र धत्ते रूपविभागकान्[4] ।

धृत्वा पुष्णाति तं गर्भं स्वयं धाताऽनिरुद्धकः ।

एवं पुनः सृजते विश्व[5]मेतदनाद्यनन्तो हि जगत्प्रवाहः[6]

नित्या हि जीवाः प्रकृतिश्च नित्या कालश्च नित्यः किमु देवदेवः ।

[यथा समुद्रः सरितः प्रयाता पुनस्तमेव प्रविशन्ति श्श्वत्। एवं हरेर्नित्यजगत्प्रवाहः तमेव चासौ प्रविशत्यजस्रम् । एवं विदुर्ये परमामतामजस्य शक्तिं पुरुषोत्तमस्य । तस्य प्रसादा[द]थ दग्धदोषास्तमाप्नुवन्त्याशु परं परेशम् । इति सृष्टिप्रकरणम्।][7]

अथ पालनम्-

नारायणः चतुर्युगेषु बहुरूपैः पालनं करोति ।

---

1. दृश्यसतोऽनुरूपा । - प्रा-1, प्रा-2
2. निर्यापयति - प्रा-1, प्रा-2
3. जगत्पतिः - अ
4. रूपविभागवान् - अ
5. सर्व - अ
6. प्रवातः । - प्रा-1
7. आवरणचिह्नान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2

[मनुष्यमानात् त्रिशतं सषष्टिकं दिवौकसामेकमुशन्ति वत्सरम् । त्रिंशत्सहस्रैरपि तैश्चतुर्युगं कृतत्रेताभिः तादृश एव हीनैः।]

मनुष्यमानाद्[1] वर्षाणां त्रिशतं सषष्टिकं देवानाम् एकवत्सरं भवति । देवमानेन चतुःसहस्रं अष्टौ शतानि वत्सराणि कृतयुगे[2] त्रिसहस्रषट्शतानि त्रेतायां द्विसहस्रचतुश्शतानि[3] द्वापरे एकसहस्रं शतद्वितयं[4] कलौ । एवं चतुर्युगमानं द्रष्टव्यम् । तद् युगचतुष्टयं सहस्रवारमावर्तितं चेद्[5] ब्रह्मणः अहर्भवति । रात्रिरपि तावती ।

[युगभेदेन आराधनक्रमः]

'कृते शुक्लश्चतुर्बाहुर्जटिलो वल्कलाम्बरः ।
कृष्णाजिनोपवीताक्षान् बिभ्रद् दण्डकमण्डुलू ।
मनुष्यास्तु तदा शान्ता निर्वैराः सहृदः समाः ।
यजन्ति तापसा[6] हंसं शमेन च दमेन च ।
त्रेतायां रक्तवर्णोऽसौ चतुर्बाहुस्त्रिमेखलः ।
हिरण्यरेता[7]स्त्रय्यात्मा[8] स्रुक्स्रुवाद्युपलक्षणः[9] ।

---

1. मानात्तु - अ
2. संवत्सराणि कृते - अ
3. सहस्रद्वयं चतुश्शतानि - अ
4. शतद्वयं - प्रा-1, प्रा-2
5. सहस्रवारं परावर्तितं च - प्रा-1, प्रा-2
6. तपसा - प्रा-1, प्रा-2
7. हिरण्यकेश - अ
8. हिरण्यकेशस्त्रय्यात्मा
9. श्रुक्श्रुवाद्युपलक्षणः - प्रा-1

ते तदा मनुजा विष्णुं सर्वदेवमयं हरिम् ।
यजन्ति विद्यया त्रय्या धर्मिष्ठा ब्रह्मवादिनः ।
द्वापरे भगवान् रामः[1] पीतवासा निजायुधः ।
तं तथा[2] पुरुषं मर्त्याः[3] महाराजोपलक्षणम् ।
यजन्ति वेदतन्त्राभ्यां[4] परं जिज्ञासवो[5] नृपाः[6]
कृष्णवर्णं कलौ कृष्णं साङ्गोपाङ्गं[7] सपार्षदम् ।
यज्ञैः संकीर्तनप्रायैः यजन्ति हि सुमेधसः ।
[ध्येयं सदा परिभवघ्नमभीष्टदोहं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्य[म्] ।
भृत्याऽऽर्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ते चरणारविन्दम् ।
त्यक्त्वा सदुस्त्यजसुरेप्सितराज्यलक्ष्मीं
धर्मिष्ठ आर्यवचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सितमन्वधावद्

---

1. शामः - अ
2. तदा - प्रा-2
3. मनुजाः पुरुषं - प्रा-1, प्रा-2
4. देवतन्त्राभ्यां - प्रा-1,प्रा-2
5. परिजिज्ञासवो - अ
6. नृपः - प्रा-1 प्रा-2 अ
7. पाङ्ग - चेन्नै, प्रा-1

वन्दे महापुरुष ते चरणारविन्दम् ।'

इत्यादिभगवद्रूपैः स्थितिर्ज्ञेया ।][1] (भाग. 11)

।। अथ तारतम्यं संक्षेपविस्तराभ्यां[2] निरूप्यते ।।

[अजं सर्वेश्वरं व्यासं ज्ञानदं मध्वनायकम् ।

गुरुं नत्वा तारतम्यं वदिष्ये तत्कृपाबलात्।][3]

[देवतातारतम्यम्]

तत्रादौ सोपानज्ञापकं तारतम्यमुच्यते[4] -

विष्णुश्रीब्रह्मवाणीशनीलोपेन्द्रा[5] असुर्गुरुः ।

प्रवहः सूर्यवरुणनारदाग्निवसिष्ठकाः ।

मित्रविघ्नेश्वरौ चैव पृथुर्गङ्गा च केचन ।

स्वाहा[6] बुधौषा शयनः[7] पुष्कराजानदेवताः ।

पितरो देवमनुज[8] गन्धर्वाश्चक्रवर्तिनः ।

---

1. आवरणचिह्नान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
2. 'संक्षेपविस्तराभ्यां' - नास्ति अ
3. आवरणचिह्नान्तर्गतो भागः 'वदिष्ये तत्कृपाबलात्' इत्यत्र 'विविच्येत कृपाबलात्' इति पाठान्तरपूर्वकं नारायणः कृष्णहरी उपेन्द्रः सर्व एव च'(श्लोकसंख्या-) इति श्लोकानन्तरम् अस्ति - अ
4. सोपानज्ञापकाणुतारतम्यमुच्यते - अ
5. मेन्द्रा - प्रा-1, प्रा-2
6. 'स्वाहा' - नस्ति - प्रा-2
7. वुधोपःशयनः - प्रा-2
8. मनुजाः - अ

मनुष्योत्तमपर्यन्ताः[1] प्रीयन्तां[2] गुरवो मम ।

[एतद्विवरणरूपत्वेन बृहत्तारतम्यमुच्यते ।

आदौ विष्णुरित्यस्य विवरणमाह -

'मत्स्यः कूर्मः क्रोडसिंहौ वटुरामौ च भार्गवः ।

कृष्णबुद्धौ कल्किदत्तहयग्रीवैतरेयकाः ।

वेदव्यासश्च वैकुण्ठकपिलौ वृषभस्तथा ।

नारायणी तापसश्च यज्ञो धन्वन्तरिस्तथा ।

नारायणः कृष्णहरी उपेन्द्रः सर्व एव च ।'][3]

[विष्णुरित्येतद् विवृणोति -

विष्णुः सर्वोत्तमोऽनन्तगुणैः पूर्णो निरञ्जनः ।

'जगृहे पौरुषं रूपमादौ लोकसिसृक्षया[4] ।

द्वितीयं पद्मनाभो वै यस्माज्जज्ञे पितामहः ।

एतन्नानावताराणां निदानं बीजमव्ययम् ।

---

1. पर्यन्तान् - प्रा-1 प्रा-2
2. प्रियतां - प्रा-1
3. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2 ; एतदनन्तरं अ प्रतौ-
अजं सर्वेश्वरं व्यासं ज्ञानदं मध्वनायकम् ।
गुरून्नत्वा तारतम्यं विविच्येत कृपावलात् । इत्यस्ति ।
एष श्लोकः 'विविच्येत कृपावलात्' इत्यत्र'वदिष्ये तत्कृपावलात्' इति पाठान्तर-पूर्वकं 'अथ तारतम्यं संक्षेपविस्तराभ्यां निरूप्यते'इति निरूपणानन्तरम् अस्ति (श्लोकसंख्या-) - प्रा-1, प्रा-2)
4. पौपं रूपं - प्रा-2, पौरुषमादौ सृसृक्षया - प्रा-1

स एव प्रथमं देवः कौमारं सर्गमास्थितः ।
चचार दुश्चरं ब्रह्म ब्रह्मचर्यमखण्डितम् ।
चतुर्थे तु भवायास्य रसातलगतां महीम् ।
उत्तरिष्यन्नुपादत्ते यज्ञेशं सौकरं वपुः ।
पञ्चमं ऋषिसर्गं वै देवर्षित्वम् उपेयिवान् ।
षष्ठे धर्मकलासर्गे नरनारायणावृषी[1] ।
सप्तमः कपिलो नाम सिद्धेशो[2] ज्ञानदायकः ।
अष्टमोऽत्रेरपत्यत्वं वृतः प्राप्तोऽनसूयया ।
ततो नवम आकूत्यां रुचेर्यज्ञोऽभ्यजायत ।
दशमो मेरुदेव्यां नु नाभेर्जात उरुक्रमः ।
ऋषिभिर्याचितो भेजे सुरूपां पार्थिवं पुनः ।
रूपं संजगृहे मात्स्यं चाक्षुषान्तरसंप्लवे ।
सुरासुराणामुदधिं मथ्नतां मन्दराचलम् ।
दध्रे कमठरूपेण पृष्ठे त्रयोदशे विभुः ।
धन्वन्तरो हरिः साक्षात् चतुर्दशम उच्यते[3] ।
स्त्रीरूपो पञ्चदशमः पालयामास वै सुधाम् ।
षोडशं नारसिंहं च यो जघ्ने दैत्यमूर्जितम् ।
सप्तदशं वामनकं कृत्वाऽगादध्वरं बलेः ।

---

1. ऋषी - प्रा-1
2. सिद्धेशः - प्रा-1 प्रा-2
3. रुच्यते - प्रा-1

अष्टादशेऽवतारे तु यच्छन् ब्रह्मद्रुहो नृपान् ।
त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम् ।
एकोनविंशेऽवतारे[1] सत्यवत्यां पराशरात् ।
जातो विस्तारयमामास वेदशास्त्रपुराणकान् ।
नरदेवत्वमापन्नः सुरकार्यचिकीर्षया ।
समुद्रनिग्रहादीनि चक्रे वीर्याण्यतः परम् ।
एकविंशेऽवतारे तु वृष्णिषु प्राप्य जन्मनि ।
रामकृष्णविति भुवो भगवानहरद्भरम् ।
ततः कलौ संप्रवृत्ते संमोहाय सुरद्विषाम् ।
बुद्धो नाम्ना जिनसुतः कीकटेषु[2] भविष्यति ।
अथासौ युगसन्ध्यायां दस्युप्रायेषु राजसु ।
भविता विष्णुयशसो नान्मा कल्की जगत्पतिः ।
जन्म गुह्यं भगवतो य एवं प्रयतो नरः ।
सायं प्रातर्गृणन् भक्त्या दुःखग्रामाद् विमुच्यते ।'][3] (भाग. 1.1)
एवमाद्यो हरिः साक्षात् अनन्तगुण उच्यते ।

श्रीरित्येतद् विवृणोति[4] -

'श्रीभूदुर्गाऽम्भ्रणी ह्रीश्च महालक्ष्मीश्च दक्षिणा ।
जयन्ती जानकी सत्या रुक्मिणीत्यादिका रमा ।

1. विंशो - प्रा-1
2. कीटकेषु - प्रा-2
3. आवरणचिह्नान्तर्गतो भागः नास्ति - अ
4. श्रीरित्यस्य भावमाह - अ

सर्वदा सुखरूपा च सर्वदा ज्ञानरूपिणी ।
विष्ण्वावेशयुताऽनन्तगुणैर्हीना हरेः स्मृता[1] ।'

ब्रह्मेत्यस्य भावमाह -

[ब्रह्मवाय्वोः नामरूपाणि]

'विरञ्चिश्च महान् ब्रह्मा प्राणः सूत्रं[2] धृतिः स्मृतिः ।
[मेधा मुक्तिर्विष्णुभक्तिश्चित्रं वायुर्महाप्रभुः ।
बलिस्थितिर्ऋजुयोगः प्रज्ञा ज्ञानं महागुरुः ।
महाध्याता च विज्ञाता वैराग्यं रोचनः सुखम् ।][3]
हनुमान् भीम आनन्दः इत्यादिबहु[4]रूपिणौ ।[5]
विष्णाविष्टौ ब्रह्मवायू[6] श्रियः कोटिगुणाधमौ ।
[तत्रेदानीं किञ्चिदूनो वायुर्ब्रह्मत्वमेष्यति ।'][7]

धृत्यादिशब्देन तदभिमानी ग्राह्यः ।

[तत्रादौ त्रीणि रूपाणि[8]चतुर्मुखरूपाणि । इतराणि वायुरूपाणि ।

---

1. एष श्लोकः पूर्वार्धोत्तरार्धयोर्विपर्यासेन दृश्यते - अ
2. प्राणसूत्रं - अ
3. आवरणान्तर्गतो भागः नास्ति - प्रा-1 प्रा-2
4. रूपिणौ - प्रा-1 प्रा-2
5. रोचनो हनुमान् भीम आनन्देत्यादिरूपिणौ - प्रा-1, प्रा-2
6. वायुः - अ
7. आवरणचिह्नान्तर्गतो भागः 'इतराणि वायुरूपाणि' इत्यनन्तरं वर्तते - प्रा-1, प्रा-2 ; अ प्रतौ तु नास्त्येव ।
8. 'रूपाणि'नास्ति - प्रा-1 प्रा-2

'विष्णाविष्टौ ब्रह्मवायू श्रियः कोटिगुणाधमौ ।

वाणीत्यस्य भावमाह -

[वाणीभारत्योः नामरूपाणि]

सरस्वती हरिप्रीतिः सर्ववेदात्मिका भुजिः ।
गायत्री गुरुभक्तिश्च श्रद्धा प्रीतिः सुखात्मिका[1] ।
शिवकन्येन्द्रसेना[2] च द्रौपदी काशिजा तथा ।
[चन्द्रेतिब्रह्मवायोस्तु भार्ये भर्तुः शताधमे ।'
तत्र सरस्वती ब्रह्मपत्नी। भारत्याद्या वायुपत्न्यः ।][3]

ईशेत्यादिदेवताः[4] स्वसमानदेवतास्तदवरतदावेशतद्गुणसूचकाः । एवमुत्तरत्रापि द्रष्टव्यम्[5] ।

[शेषस्य नामरूपाणि]

'हरीरयुङ् नरः शुक्लकेशयुक्तो बलस्तथा।
संकर्षणावेशयुतो लक्ष्मणः परिकीर्तितः ।
सदाशिवस्तपोऽहंकृद् वाय्वाविष्टः[6] शुकस्तथा ।

---

1. एतच्छ्लोकस्थाने 'सरस्वती तु गायत्री श्रद्धा प्रीतिः सुखात्मिका।'इत्यस्ति - अ
2. कन्येन्द्रिसेना - प्रा-1
3. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
4. ईशेत्यादिशब्दाः - प्रा-1; प्रा-2
5. एवमु.ारप्रद्रष्टव्यम् - अ
6. वाण्याविष्टः - प्रा-1, प्रा-2

ऊर्ध्वो वटुर्वामदेवः[1] सद्योजातो ह्यघोरकः[2] ।
तत्पुमान् द्रौणिरौर्वश्च दुर्वासो मुनिरेव च ।
जैगीषव्यादिरूपेण शेषरुद्रौ प्रकीर्तितौ ।
(दुर्वासो द्रौणि[3]रित्येवं शेषरुद्रौ प्रकीर्तितौ[4] ।
गरुडश्च त्रयश्चैते सरस्वत्याः शतावराः ।
[अथ[5] जाम्बवती लक्ष्म्यावेशे शेषसमा मता[6] ।'][7]

नीलेत्यस्य भावमाह -

[कृष्णस्य षण्महिष्यः]

'नीला भद्रा मित्रविन्दा कालिन्दी लक्षणा तथा ।
जाम्बवत्याः किञ्चिदूनाः देव्यावेशयुता[8] अपि ।
देव्यावेशह्रास[9]काले प्रद्युम्नाद् द्विदशाधिकाः[10] ।'

---

1. वटो वामदेवः - अ
2. ह्यघेरकः - प्रा-1
3. दुर्वासा द्रोणि - प्रा-1
4. प्रा-1, प्रा-2
5. अत्र - प्रा-1, प्रा-2
6. शेषसमन्विता - अ
7. आवरणान्तर्गतो भागः 'नीलेत्यस्य भावमाह'-इत्यनन्तरं वर्तते - अ
8. देव्या शेषयुता - अ
9. ह्रास - अ
10. प्रद्युम्नस्तु द्विदशाधिकः - अ

उमेत्यस्य भावमाह -

[उमावारुण्योः रूपनामानि]

'रेवती श्रीयुता श्रीश्च पेयरूपा च वारुणी ।
सौपर्णी पार्वती चैव तिस्रः शेषाच्छतावराः ।'
[रिवत्यादयस्तिस्रः वारुण्यावरा इत्यर्थः][1]

इन्द्र इत्यस्य भावमाह -

[इन्द्रस्य नामरूपाणि]

'पुरन्दरो मन्त्रद्युम्नो[2]ऽर्जुनो नरहरीरयुक् ।
वाली गाधिर्विकुक्षिश्च[3] कुशाद्या इन्द्र उच्यते ।
प्रद्युम्नयुक्तौ प्रद्युम्नभरतौ च[4] सुदर्शनः[5] ।
ब्रह्मयुक् साम्बः स्कन्दश्च कुमारः काम उच्यते ।
शतावरा[6] उमायाश्च काम इन्द्राधमोऽल्पतः[7] ।'

1. आवरणचिह्नान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
2. द्युम्ना - अ
3. गाधी विकुक्षिश्च - अ
4. प्रद्युम्नयुक्तः प्रद्युम्नः भरतश्च - अ
5. सुदर्शनम् - प्रा-1, प्रा-2
6. दशावरा - प्रा-1, प्रा-2
7. मतः - अ

असुरित्यस्य भावमाह -

[अहङ्कारप्राणगुर्वादीनां नामरूपाणि]

अहंकारभवः[1] प्राणः शक्रादेर्यो[2] दशावराः । (दशावरः ।)

गुरुरित्यस्य तत्समानदेवताकथनपूर्वकं भावमाह -

'तारो ब्रह्मांशयुग् द्रोणो वायुयुक्तोद्धवो[3] गुरुः ।
अनिरुद्धयुक्तौ शत्रुघ्नानिरुद्धौ कामनन्दनौ[4] ।
कामभार्या रुक्मवती[5] लक्षणा रतिरेव च ।
तारा चित्राङ्गदेत्यादिरूपा शच्यपि[6] हि स्मृता ।
स्वायम्भुवो मनुर्दक्षः षडन्योन्यं समा[7] मताः[8]
प्रवहात् पञ्च गुणतोऽधिकाः प्राणाद्दशावराः ।'

प्रवह इत्येतद् विवृणोति -

भूताभिमानी प्रवहः सूर्याद्धि[9] द्विगुणाधिकः ।

---

1. अहंकारो भवः - अ
2. शक्राद् ज्ञेयो - प्रा-1, प्र-2
3. द्धतो - प्रा-1, प्रा-2
4. अनिरुद्धयुक्तशत्रुघ्नोऽनिरुद्धः कामनन्दनः - अ
5. रुग्मवती - प्रा-1, रुग्मावती - प्रा-2
6. शच्यापि - प्रा-2
7. षडन्योन्यसमा - अ
8. मता - प्रा-1, प्रा-2
9. सूर्या.ु - अ

सूर्य इत्येतत् सपरिकरं निरूपयति -

[सूर्यस्य नामरूपाणि]

जाम्बवान् वायुयुग् धर्मो विदुरः सत्यजिद् यमः ।
ब्रह्माविष्टश्च सुग्रीवो हरियुक् कर्ण एव च ।
एवं द्विरूपः सूर्यश्च इन्द्राविष्टोऽङ्गदः[1] शशी ।
शतरूपा च चत्वारः प्रवहाद् द्विगुणाधमाः[2] ।

वरुणेत्यस्य भावमाह -

[वरुणस्य नामानि अवताराश्च]

महाभिषक् सुषेणश्च मण्डूकः शन्तनुस्तथा ।
एते प्राग् वरुणश्चन्द्रात् पादात् पादार्धतोऽधमाः[3]

नारदेत्येतद् विवृणोति -

[नारदादीनां तारतम्यनिरूपणम्]

[अग्निशब्दः स्वसमानदेवतातदवतारतदावेशसूचकः][4]
[वरुणान्नारदो न्यूनो वह्निरभ्यधिको मतः ।][5]

---

1. सूर्यः स्यादिन्द्राविष्टोऽङ्गदः - अ
2. प्रवहाद्धि गुणाधमाः - अ
3. पादाधितोऽधमाः । - प्रा-1, प्रा-2
4. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
5. आवरणान्तर्गतो भागः नास्ति - अ

अग्निरित्येतद् विवृणोति -

[अग्नेः नामानि अवताराश्च]

दृष्टद्युम्नो लवो नील इत्याद्यग्निप्रसूतिका ।
जरा व्याधो[1] भृगुः प्राक् च[2] त्रय एते सदैव हि ।
वरुणात् पादतो न्यूनाः[3] मित्रात्तु[4] द्विगुणाधिकाः ।

वशिष्ठक[5] इत्यस्य भावमाह -

[सप्तर्षयः]

मरीचिरत्र्यङ्गिरसौ पुलस्त्यः[6] पुलहः क्रतुः ।
विश्वामित्रो वसिष्ठश्च वैवस्वतमंनुस्तथा ।
नववह्न्यवरा नित्यं मित्रात् किञ्चिद् गुणाधिकाः ।

मित्रेत्यस्य विवरणमाह -

[मित्र-विघ्नेशादीनां नामानि अवताराश्च]

राहुयुग्[7] भीष्मको मित्रः कृपी तारा प्रकीर्तिताः[8]

---

1. जराव्याधौ - प्रा-1, प्रा-2
2. 'च' नास्ति - प्रा-1, प्रा-2
3. न्यूनः - प्रा-1, प्रा-2
4. मित्रा तद् - प्रा-1
5. वसिष्ठका - अ
6. मरीचिरत्र्यङ्गिरसो - प्रा-2 ; मरीचिरित्यङ्गिरसो पुलस्थः - प्रा-1 'पुलस्त्यः' नास्ति - प्रा-2
7. राहुश्च - अ
8. प्रक्रीर्तिता - प्रा-1, प्रा-2

महाबली दुर्मुखश्च रुद्रयुक्तो घटोत्कचः ।
द्वावेतौ निर्ऋतिः पूर्वं प्रावही च[1] तथा मता ।
चत्वार एते पर्जन्याद् द्विगुणेनाधिकाः स्मृताः[2] ।
वह्न्यवरा इत्यपि ग्राह्यम् ।
[महाबली इत्येतद् दुर्मुखेत्यस्य विशेषणम् ।][3]

विघ्नेश्वर इत्यस्य सपरिकरं भावमाह -

[अत्र चारुदेष्णो विघ्नपः, प्रागित्यारभ्य विघ्नेशप्रमुखाः सर्वे मित्रात् किञ्चित् गुणाधमाः - इत्यतः प्राक्तनग्रन्थः विघ्नेश्वरसममित्राधमदेवता-कथनार्थः][4]

चारुदेष्णो विघ्नपः प्राग् विष्वक्सेनस्तथैव च ।
मरुतां पञ्चकं चेति मित्रात् किञ्चिद् गुणाधमाः[5] ।
रुद्रयुग् भगदत्तश्च[6] कथनो द्वौ[7] जनेश्वरः[8] ।

---

1. प्रावहीति - अ
2. मताः - अ
3. आवरणचिह्नान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
4. आवरणचिह्नान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
5. गुणाधिकाः - प्रा-1, प्रा-2
6. भागदत्तश्च - प्रा-2
7. कत्थनोदौ - प्रा-1
8. धनेश्वरः - अ

[अष्टौ वसवः]

द्रोणः प्राणो ध्रुवोऽर्कोऽग्निः[1] दोषा[2] वसुविभावसू ।
वसुष्वेतेषु भीष्मः प्राक्[3] ब्रह्मयुक्तो द्युनामकः ।
नन्दगोपः पुरा द्रोणो वह्न्यन्ये सप्त कीर्तिताः ।

[द्रोणः द्रोणनामकवसुः][4]

वह्निव्यतिरिक्तसप्तवसवः मित्राधमा इति[5] कीर्तिता इत्यर्थः ।

[एकादशरुद्राः]

रैवतोऽजो[6] भुवो भीमो वाम उग्रो वृषाकपिः[7] ।
अजैकपादहिर्बुध्न्यो[8] विरूपाक्षो[9] महानिति ।
रुद्रा एकादशैतेषु[10] भूरि पूर्वमजैकपात् ।
भूरिश्रवाः सर्वरुद्रयुक्तो हि बुध्न्य[11] उच्यते ।

---

1. ध्रुवार्कोऽग्निः - प्रा-1,प्रा-2
2. शेषो - प्रा-1, प्रा-2
3. वसुष्वते ष्वमस्तु प्रा-2, वसुष्वेतेष्वषृमस्तु प्रा-1
4. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
5. 'इति'नास्ति - प्रा-1, प्रा-2
6. रैवतेजो - प्रा-1, प्रा-2
7. उग्रवृषाकपी - अ
8. अजैकपादहिर्बुध्नि - प्रा-2, अजैकपद-हिर्बुध्नि - प्रा-1
9. वहुरूपो - अ
10. एकादशे - प्रा-1 प्रा-2
11. बुध्नि - प्रा-2

मूलरुद्रं भवमृते दश रुद्राः प्रकीर्तिताः[1] ।
शलः पूर्वं विरूपाक्षः कृपो विष्कम्भ[2] उच्यते ।
सहदेवः सोमदत्तः एतौ प्राक् पत्रतापनः[3] ।
विरूपाक्षादयो नामभेदा रुद्राः प्रकीर्तिताः ।

[द्वादशादित्याः]

विवस्वानर्यमा पूषा त्वष्टा च सविता भगः ।
धाता पर्जन्यवरुणौ मित्रः शक्र उरुक्रमः ।
एतेषु कृष्णजो भानुः सवित्रंश उदाहृतः ।
वीरसेनोऽर्यमाविष्टः त्वष्टा वै परिकीर्तितः ।
एते हि[4] द्वादशादित्या मित्रं शक्रमुरुक्रमम् ।
विवस्वन्तं च वरुणं पर्जन्यं च विनात्र षट् ।
षट्संख्याका मित्राधमा[5] इत्यर्थः ।

[मरुद्देवाः]

वायुयुक्तः पाण्डुराजः परावह उदाहृतः ।
संपाती[6] केसरी श्वेतस्त्रयो मरुत एव हि ।

---

1. मित्राधमा मताः - अ
2. कृतो विष्वम्भ - अ
3. पत्रतापकः - अ
4. 'हि'नास्ति - प्रा-1, प्रा-2
5. मित्रधामा - प्रा-1
6. संपातः - अ

चेकितानः प्राक् प्रतिभू[1]र्विपृथुः[2] सौम्य उच्यते ।
शर्वोत्तुङ्ग[3]गजश्चापि प्राणवायुरुदाहृतः ।
[प्राणशब्देनाहङ्कारिकभिन्नो ग्राह्यः][4]
गवाक्षस्तु प्रागपानो मरुश्रेष्ठः प्रकीर्तितः ।
गवयः प्राग्वानरा[5] नाम वृषः पूर्वमुदाहृतः[6] ।
[शर्वत्रातो गन्धमादो द्वौ समान उदाहृतः][7]
नागश्च कृकलश्चैव देवदत्तो धनञ्जयः ।
कुन्तिभोजः पुरा कूर्म[8] उद्धवश्च परावहः ।
आवहो विवहश्चैव संवहश्च तथापरे ।
विना प्राणं च प्रवहं मरुतां पञ्चकं तथा ।
प्रतिविन्ध्यः सुतसोमः[9] श्रुतकीर्ति[10]स्तथैव च ।
शतानीकः श्रुतकर्मा[11]पञ्चैते द्रौपदीसुताः ।

---

1. प्रतिभो - अ
2. र्विप्रथुः - प्रा-1
3. सरो.ुङ्गो - प्रा-1, प्रा-2
4. आवरणचिह्नान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
5. प्राम्या - अ
6. पूर्वमुदानकः - अ
7. आवरणचिह्नान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
8. कूर्मो - प्रा-1
9. प्रतिविन्ध्यसुतः सोमः -अ, श्रुतसोमः - प्रा-2, सितसोमः - प्रा-1
10. श्रुतिकीर्ति - अ, प्रा-1, प्रा-2
11. श्रुतः कर्मा - अ, प्रा-1 प्रा-2

[अवशिष्टाश्च[1] समा मित्राधमा मताः ।][2]

विश्वेदेवताः[3] -

समाविष्टाश्चित्ररथाभितां तां तथैव च ।[4]

किशोरगोपालबलैः गन्धर्वैश्च महात्मभिः ।

द्रौपदेयाः केकयेयाः प्राग् विश्वेदेवाः दश स्मृताः[5] ।

सत्यो वसुः क्रतुर्दक्षः[6] कामः कालो धनुर्धरः ।

पुरूरवा आर्दवश्च विश्वेदेवा दश स्मृताः ।

अश्विनौ[7] -

इन्द्रयुग् द्विविदो[8] मैन्दो नकुलः सहदेवकः ।

त्रिशिखो विभुरित्येते[9] ह्यश्विनौ परिकीर्तितौ ।

द्यावापृथिव्यौ[10] ऋभवः पितृणां[11] पतयस्तथा ।

---

1. अवशिष्टश्च - प्रा-1 आवशिष्टाश्च - प्रा-2 'अवशिष्टश्च' इत्यनन्तरं त्रयाणाम् अक्षराणां लोपः प्रतीयते ।
2. आवरणान्तर्गतो भागः नास्ति - अ
3. विश्वेदेवानाः - प्रपा-1, प्रा-2 । एतन्नास्ति - अ
4. समाविष्टाश्चित्ररथाभीताम्राभ्यां तथैव च(?) - अ
5. अत्र 'प्राग्' इत्यधिकमिव प्रतीयते ।
6. वसुश्चतुर्दक्षः - प्रा-1, प्रा-2
7. एतन्नास्ति - प्रा-1, प्रा-2
8. इन्द्रवदो - अ, इन्द्रयुग्विविदो - प्रा-1
9. त्येके - अ
10. द्यावापृथिव्या - प्रा-1, प्रा-2
11. पितृणां - प्रा-1

विघ्नेशप्रमुखाः सर्वे मित्रात्[1] किञ्चिद्गुणाधमाः ।

पृथुरित्यस्य भावमाह -

अत्र पावकोऽग्नेरित्यारभ्य अश्विन्यूनाश्च पर्जन्यादित्यतः प्राक्तनो ग्रन्थः पृथुसमान अश्विन्यूनदेवताकथनार्थः ।

अत्र[2] -

[कर्मदेवाः]

पावकोऽग्नेः प्रथमजः उचथ्य[3]श्चवनस्तथा ।
रैवतश्चाक्षुषश्चैव स्वारोचिष उतोत्तमः ।
सावर्णी ब्रह्मसावर्णी रुद्रसावर्णिरेव च ।
देवेन्द्रदक्षधर्माश्च[4] सावर्ण्यन्ताः[5] पितृसप्तकम् ।
कार्तवीर्यः कृतश्चैव शशिबिन्दुः प्रियव्रतः[6] ।
दौष्यन्तिर्भरतश्चैव ककुत्स्थो गय एव च ।
ऋषभाद्धरिणाद्धि प्राक्[7] त्रिजन्मा भरतस्तथा ।
मान्धातेत्यादिराजानो विष्ण्वावेशयुतास्तथा[8] ।

1. मित्राः - अ
2. 'अत्र' नास्ति - प्रा-1, प्रा-2
3. उचित्थ्य - प्रा-1
4. धर्माद्या - अ
5. सावर्ण्यता - अ
6. प्रियवृतः - प्रा-1
7. ऋषभाद्धारिणाद्विप्रा - अ
8. युताः सदा - प्रा-1, प्रा-2

बलिरद्भुतशम्भुश्च[1] विधृतिः स्तुतिनामकः[2]

दिवस्पतिः शुचिश्चैव गन्धर्वेष्वष्टकं तथा ।

बल्याद्याः कार्तवीर्याद्याः कर्मदेवाः प्रकीर्तिताः ।

[अग्नेः प्रथमः विजिताश्वः उचथ्यश्च्यवनो ऋषिः ।

देवेन्द्रद्रक्षेतिशब्दः सावर्णिशब्दान्तत्वेन योज्यः ।][3]

[पावकाद्याः कर्मजाश्च सर्व एतत् प्रदर्शिताः ।

अश्विन्यूनाश्च पर्जन्यादधिका इति कीर्तिताः।][4]

गङ्गेत्यस्य भावमाह -

[शरभेत्यारभ्य वरुणभार्यका इत्यन्तं प्राक्तनो ग्रन्थः गङ्गासमान-देवताकथनार्थः ।][5]

[पावकादधमाः देवाः]

शरभो[6]ऽर्केषु[7] पर्जन्यो देवकी श्यामला पुरा[8] ।

देवकी[9] युधिष्ठिरभार्या ।

---

1. शम्भू - अ
2. स्त्व[ष्ट]()धामकः । - प्रा-1, प्रा-2
3. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
4. आवरणान्तर्गतो भागः नास्ति - अ
5. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
6. शरशो - प्रा-1
7. शरभार्केपु - अ
8. पर्जन्या देवकी श्यामली पुरी - अ
9. देवका - प्रा-2

चन्द्रस्त्री रोहिणी चैव सूर्यभार्या च संज्ञका[1] ।

अनिरुद्धस्य भार्योषा गङ्गा वरुणभार्यका ।

पावकादधमाः षट् स्युः[2] स्वाहाया द्विगुणाधिकाः ।

केचनेत्यस्य भावमाह -

पर्जन्यादधमाः केचित् तेभ्यः स्वाहाधमा[3] मता[4] ।

स्वाहेत्यस्य भावमाह -

स्वाहोषसो दशगुणा पर्जन्याद् द्विगुणाधमा[5] ।

[अश्विभार्या दशगुणाधिका ।][6]

बुधेत्यस्य भावमाह[7] -

[स्वाहाया अधमाः देवाः]

अभिमन्युः कृष्णचन्द्रधर्मे चन्द्रांशुयुग्[8] बुधः ।

उषसश्चाधिकः प्रोक्तः स्वाहाया अधमो मतः ।

---

1. संज्ञिका - अ
2. पावकादधमाः पंदः - अ
3. स्वाहादधमा - अ
4. मताः - प्रा-1, प्रा-2
5. दशगुणाः पर्जन्यादिगुणाधमाः । - प्रा-1, प्रा-2
6. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
7. युद्धेत्यस्य भावमाह
8. धर्मेन्द्राश्चियुक् - अ

उपेत्यस्य भावमाह -

जरासन्धस्य पुत्री च[1] शल्यस्य[2] च तथाऽत्मजा ।

उभे अप्यश्विभार्योषा[3] ।

शनिरित्यस्य भावमाह -

तस्या अप्यवरः शनिः ।

[जरासन्धशल्यपुत्र्यौ नकुलसहदेवपत्न्यौ ।][4]

पुष्करेत्यस्य भावमाह[5] -

शनेस्तु[6] पुष्करो[7] न्यून[8] उषसस्तु[9] दशाधमः ।

आजानदेवता[10] इत्यस्य भावमाह -

[आजानेया आनाख्येयाः इत्यारभ्य कार्तवीर्यादि राजभ्यः आजानेया वराः इत्यतः प्राक्तनग्रन्थेषु समानवाचकाः][11]

---

1. या - प्रा-1, प्रा-2
2. शलस्य - अ
3. अश्विभार्योषा - प्रा-1 ; अश्विभार्योपाः -चेन्नै
4. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
5. पुष्करेत्येतद् विवृणोति - अ
6. शनैश्चरः - अ
7. पुष्करे - प्रा-1, प्रा-2
8. न्यूनो - प्रा-1, प्रा-2
9. उपस्तु - अ
10. आजानदेवा - अ
11. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2

[अजानेयादिदेवाः]

आजानेया अनाख्याताः देवादेवकुलोद्भवाः ।
विराधश्चोद्वहाविष्टः[1] संजयौ द्वौ च तुम्बुरुः ।
जनमेजय आविष्टः त्वष्टा चित्ररथः पुरा ।
दमघोषकबन्धौ द्वौ[2] दनुर्गन्धर्व उच्यते ।
[दनुर्नाम गन्धर्व इत्यर्थः][3]
ब्रह्मा स्वायम्भुवाविष्टो ह्यक्रूरः[4] प्राक्किशोरकः[5] ।
[किशोरनामगन्धर्व इत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् ।][6]
वायुयुग् धृतराष्ट्रश्च धृतराष्ट्राभिधः पुरा[7] ।
नक्रस्तथोद्वहाविष्टो[8] द्रुपदौ द्वौ हुहू[9] पुरा ।
विराटः प्राक् विवहयुक्[10] महादेवस्य[11] गायकः ।

---

1. द्विहाविष्टः - अ
2. दमघोपं व - अ
3. आवरणान्तर्गतो भागः नास्ति - अ
4. ब्रह्म स्वयम्भु विष्णो ह्युक्रूर - अ
5. प्राक्किशोरगः - प्रा-2
6. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
7. धृतराष्ट्राभिधो महान् । - अ
8. नक्रस्थथावहाविष्टो - अ
9. डुहू - प्रा-1,डुहुः - प्रा-2
10. विवहकः - अ
11. हाहादेवस्य - प्रा-1, प्रा-2

नन्ददंशी[1] ह्यजगरो विद्याधर उदाहृतः ।
उग्रसेनो ह्युग्रसेनो गन्धर्वः समुदाहृतः[2] ।
युधामन्युर्धातृयुक्तो विश्वावस्वभिधः[3] पुरा ।
उत्तमौजा[4] स्त्वर्यमांशः युतश्चैव परावसुः ।
सत्यजित् प्राङ् मित्रयुक्तश्चित्रसेनो[5] महांबलः ।
तथा परे च गन्धर्वा गोपालबलपूर्वकाः ।
अथोर्वश्यप्सराः[6] संज्ञा[7] सैरन्ध्री[8] पिङ्गला पुरा ।
नकुलस्त्री पार्वती या सा पूर्वं तु तिलोत्तमा ।
कृष्णाङ्गसंगगोप्यः प्राक् शची चाप्सरसः[9] स्त्रियः ।
विश्वामित्रवसिष्ठादिवर्जिता ऋषयोऽखिलाः ।
श्रीयुक् षोडशसाहस्रस्त्रियः प्राक् वह्निपुत्रकाः ।
कशेरुत्वष्टपुत्रीया तासां मध्ये गुणाधिका ।

---

1. नन्ददंशि - प्रा-1
2. स उदाहृतः - अ
3. विश्वावस्वभिदः - प्रा-1 ; विश्ववश्वेभिधः-चेन्नै
4. उ.ामोजा - प्रा-1
5. प्राङ्मित्रयुक्तो चित्रसेनो - प्रा-1 प्रा-2
6. अथोर्वश्यापसरं-अ, अथोर्वश्यप्सरसः - प्रा-1, प्रा-2
7. 'संज्ञा नास्ति - प्रा-1, प्रा-2
8. सौरङ्घ्री - प्रा-2
9. शवर्याद्यप्सरसः - अ

पवमानक्रतौ[1] द्वौ प्राक् पवमाना[2]ग्निजः स्मृतः ।
कौशिकोऽप्यग्निजः शुन्ध्यः[3] शुचिः प्राक् शुचिरग्निजः।
तुम्बुर्वादिशतं चोर्वश्याद्या[4] अप्सरसस्तथा[5] ।
ऋषयश्च वसिष्ठादीन् ऋत आजानजाः स्मृताः ।
अग्निपुत्राः पावकोनाः आजानेयैः समा मताः ।
कार्तवीर्यादिराजभ्यः आजानेयाः शतावराः ।
[देवमनुजशब्दौ देवमनुष्यवाचकौ ।][6]

[पितर इत्यस्य भावमाह -

आजानेभ्यस्तु पितरः सप्तभ्योऽन्ये शतावराः ।
देव इत्यस्य देवगन्धर्वा इत्यर्थः ।][7]

तस्य भावमाह -

पितृभ्यो देवगन्धर्वाः अष्टोत्तरशतं विना ।
शतावरा इत्यर्थः । [मनुजगन्धर्वाश्चक्रवर्तिनः ।

---

1. क्रथौ - प्रा-1
2. पावमानोऽ - अ
3. सिन्धुः - अ
4. चोर्वस्याद्या - प्रा-1
5. चैवोर्वश्याद्यप्सरस्तथा - अ
6. आवरणान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2
7. आवरणान्तर्गतो भागः नास्ति - अ

मनुष्योत्तमपर्यन्ता इत्यस्य भावमाह -][1]

तेभ्यो मनुष्यगन्धर्वास्तेभ्यः स्युश्चक्रवर्तिनः[2] ।
तेभ्यस्तु मानुषाः श्रेष्ठाः क्रमाच्छतगुणाधमाः[3] ।

प्रीयतां[4] गुरवो[5] ममेत्यस्य[6] भावमाह -

सर्वोत्तमो विष्णुरथो रमा च ब्रह्मा च वायुश्च तदीयपत्न्यौ ।
अन्ये च देवाः सततं प्रपन्ना[7] हरौ सुभक्तिं मयि सन्दिशन्तु ।

।। इति तारतम्यं सम्पूर्णम्[8] ।।

अथ लयो[9] निरूप्यते -

[त्रिविधलयनिरूपणम्]

प्रलयस्त्रिविधः प्रोक्तो मानवः[10] प्रथमः[11] स्मृतः ।

---

1. आवरणान्तर्गतो भागः नास्ति - अ
2. मनुष्यगन्धर्वास्तेभ्यस्तु चक्रवर्तिनः - अ
3. गुणावराः - अ
4. प्रियतां - अ, प्रा-1, प्रा-2
5. 'गुरवो नास्ति - अ
6. मे इत्यस्य - प्रा-1, प्रा-2
7. प्रसन्नाः - प्रा-1, प्रा-2
8. तारतम्यं समाप्तम् - अ
9. लय - प्रा-2, लयं - प्रा-1
10. मानवो - अ
11. मानवस्त्रिविधः - प्रा-1, प्रा-2

दैनन्दिनो द्वितीयो हि ब्रह्मणो दिवसात्यये ।
तृतीयो ब्रह्मणस्तत्र लयो ब्राह्म इतीरितः ।
ब्रह्मणस्तु मुहूर्तेन मनोस्तु प्रलयो भवेत् ।
प्रलयेषु व्यतीतेषु चतुर्दशसु वै[1] क्रमात् ।
दैनन्दिनं लयं[2] प्राहुर्ब्रह्मणः स्वाप उच्यते ।

[मन्वन्तरप्रलयः]

त्रयाणामेव[3] लोकानां लयो मन्वन्तरो[4] भवेत् ।
चेतनानां तदा नाशो न लोकानां क्षयो भवेत् ।
उदकैरेव[5] पूर्तिश्च यथापूर्वं तथा[6] पुनः ।
मन्वन्तरान्तरे भूयश्चेतनानां[7] पुनर्जनिः ।
[चेतनानां तदा नाशो न लोकानां क्षयो भवेत् ।][8]

[दैनन्दिनप्रलयः]

दैनन्दिने लये ह्यत्र[9] सर्वस्यापि क्षयो भवेत् ।

1. च - अ
2. तं - अ
3. त्रयाणामपि
4. मन्वन्तरे - अ
5. उदकेनैव - अ
6. यथा - प्रा-1, प्रा-2
7. भूयाच्चेतनानां - प्रा-1, प्रा-2
8. आवरणान्तर्गतो भागः पूर्वतनस्य'त्रयाणामेव लोकानां लयो मन्वन्तरो भवेत् ।' इति श्लोकार्धस्यानन्तरं लिखितम् - प्रा-1, प्रा-2
9. ऽप्यस्य - अ

महदादीन् विना सर्वे लोका नश्यन्ति साधिपाः[1] ।
सचेतनाः साधिभूताः सुप्ते च चतुरानने ।
तत्त्वाभिमानिनो देवाः केचिच्च मुनयस्तथा ।
शिष्यन्ति सुप्ताः सर्वेऽपि सत्यलोके व्यवस्थिताः[2] ।
पुनर्निशात्यये ब्रह्मा यथापूर्वमकल्पयत्[3] ।
पुनर्दशावतारा हि देवदेवस्य चक्रिणः ।
नियमेन भवन्त्येते तथाऽन्ये प्राणिराशयः ।
सार्धद्वादशवर्षेषु पूरितेष्वहरेव तत्[4] ।

[महाप्रलयः]

।। तृतीयलयारम्भः[5] ।। तत्र मनुष्यमानेन शतवर्षपर्यन्तम् अनावृष्टिर्भवति[6] । तया सर्वेषां प्राणिनां लयः[7] । तदैव[8] सूर्यो घोरै रश्मिभिः समुद्रादीन् पिबति । ततः संकर्षणमुखान्निःसृतः संवर्तको वह्निः पातालान्निःसृत्य[9]

---

1. साधिपारः - प्रा-2
2. भवस्थिताः - प्रा-1, प्रा-2
3. यकृ र्वमकल्पयत् - प्रा-1
4. उर्वरिरेतु अहरेव-(?) - अ
5. तृतीयलयप्रारम्भः - अ
6. भविष्यति - अ
7. तदा सर्वेपां प्राणिनां क्षयः ।
8. तदा - अ
9. पातालसप्तकान्निसृत्य - अ

सर्वं दहति । तदैव शतवर्षपर्यन्तं प्रचण्डवातो वाति[1] । अथ सांवर्तकमेघाः शतवर्षपर्यन्तं करिकरवद् वर्षं वर्षन्ति[2] ।

एवं च पृथिव्याः गन्धतन्मात्रे लयः । मात्राविशिष्टपृथिव्याः अप्सु लयः । अपां रसमात्राविशिष्ट अपां तेजसि लयः[3] । [तेजसः रूपे । मात्राविशिष्ट][4] तेजसो वायौ। वायोः[5] स्पर्शे । मात्राविशिष्टवायोराकाशे[6]। आकाशस्य शब्दे । शब्दतन्मात्राविशिष्ट आकाशः । इन्द्रियरूपं मनः । वैकारिकदेवाः । तैजसेन्द्रियाणि । तथा[7] तदभिमानिदेवताः[8] तामसदेवाश्चेत्येषां मनस्तत्त्वे लयः । तस्य बुद्धितत्त्वे लयः[9] । तस्याहङ्कारतत्त्वे लयः[10] । तस्य महत्तत्त्वे लयो भवति[11] ।

[रजोभागानां सत्त्वगुणे प्रवेशो भवति । एवं प्रवेश एव गुणानां साम्यावस्थोच्यते । गुणत्रयस्यापि रजोमिश्रितसत्त्वसाम्यात् गुणत्रयस्य मूलप्रकृतौ लयो भवति][12]

---

1. भवति - अ
2. करिकरवद् वर्षति - अ
3. तेजसां - अ
4. आवरणचिह्नान्तर्गतो भागः नास्ति - अ
5. वायुः - अ
6. वायुराकाशे - अ
7. 'तथा'- नास्ति - प्रा-1, प्रा-2
8. देवताश्च - प्रा-1, प्रा-2
9. 'लयः'-नास्ति - अ
10. 'लयः'-नास्ति - अ
11. 'लयो भवति'- नास्ति-अ
12. आवरणचिह्नान्तर्गतो भागः नास्ति - प्रा-1, प्रा-2

तदा कल्यादीनां वायुगदाप्रहारेण लिङ्गदेहभङ्गो भवति । तदा दुर्गा चक्रेण ताडिता भवतीति[1] । तदा ब्रह्माण्डावरणानां व्युत्क्रमेण लयो ज्ञातव्यः । ततो दशावराणां लयो ज्ञेयः ।

[देवादीनां लयक्रमः]

शरीरादुत्क्रान्तीनां मनुष्योत्तमादीनां मार्ग उच्यते । शरीरादुत्क्रान्तः पूर्वमर्चिर्लोकं[2] गच्छति । तत आतिवाहिकलोकं, ततोऽहरभिमानिलोकम् । ततः शुक्लपक्षाभिमानिलोकम् । एवमुत्तरत्र । तत उत्तरायणम् । ततः संवत्सरम् । ततो विद्युतम् । ततो वरुणम् । ततः प्रजापतिम् । ततः सूर्यम् । ततः सोमम् । ततो वैश्वानरम् । ततो ध्रुवम् । तत इन्द्रम् । ततो भारतीलोकम् । ततो वायुलोकम् । ततो विष्णुलोकम् । न सः पुनरावर्तत इति प्रत्यहं गतिस्मरणं[3] कार्यम् ।

[शेषमार्गः]

अथ देवानां लयः - देवानुगानां कुबेरे कुबेरवरुणयोः सोमे । सोमस्य विष्वक्सेनादीनां चानिरुद्धे । अनिरुद्धस्य सनकादीनां च कामे । कामस्य वारुण्याम् । वारुण्याः शेषे । इति शेषमार्गः ।

[गरुडमार्गः]

शिष्टानां देवानामग्नौ[4] अग्नेः सूर्ये । सूर्यस्य आकाशपृथिव्योश्च गुरौ।

---

1. भवति - अ
2. पूर्वमर्चिलोकं - प्रा-2
3. मतिस्मरदं - प्रा-1
4. देवानां मग्नौ - प्रा-1

मनुष्याणां सर्वेषां पितॄणां निर्ऋतेश्च[1] धर्मस्यान्येषां मनूनां प्रियव्रतादीनां च भृगौ । भृग्वादीनां च दक्षे । मनुर्गुरोर्दक्षस्य मरुद्गणानां[2] चेन्द्रे । इन्द्रस्य सौपर्ण्याम् । सौपर्ण्याः सुपर्णे लयो भवति । इति गरुडमार्गः । सुपर्णशेषयोर्वाण्याम् । वाणी ब्रह्मणी[3] । (!वाण्या ब्रह्मणि?)ब्रह्मणः परमात्मनि । अयमेव महालयः ।

[मृतिकाले शरीरलयश्चिन्तनीयः । शरीरावच्छिन्नाकाशस्य बाह्यतेजसि । श्लेष्मपूयासृक्कार्योपेतायां बाह्याप्सु । शरीरगन्धावच्छिन्नपृथिव्या आकाशे लयः । श्वासोच्छ्वासकार्यविशिष्टवायोर्बाह्यवायौ । शरीरलोल्यगुणविशिष्टतेजसः बाह्यपृथिव्यां लयः । इन्द्रियाणि तदभिमानिदेवता अपि चिन्तनीयाः । उच्चारणादिकार्यविशिष्टवाचः अग्नौ । कृतिविशिष्टपाण्योः इन्द्रे । गतिविशिष्टपादयोर्जयन्ते ।

विसर्गसहितपायोर्मित्रे । प्रत्युपरत्युपेतोपस्थस्य मनौ । शब्दविशिष्टश्रोत्रस्य दिग्देवतासु । सस्पर्शत्वचः प्राणे । रूपोपेतचक्षुषः सूर्ये । रसयुक्तजिह्वाया वरुणे गन्धोपेतपृथिव्याः क्षितौ । बुद्धेरुमायाम् । संकल्पविकल्पकमनसः रुद्रे । शरीरादुत्क्रान्तानां मनुष्योत्तमानां मार्ग उच्यते । शरीरादुत्क्रान्तो जीवः पूर्वमर्चिर्लोकं गच्छति। ततोऽतिवाहिकवायुलोकम् । ततः अहरभिमानिलोकम् । तत्र उत्तरायणाभिमानिलोकम् । ततः संवत्सराभिमानिलोकम् । ततो विद्युदभिमानिलोकम् । ततोऽहरभिमानिलोकम् । ततो वरुणलोकम् । ततः प्रजापतिलोकम् । ततः सूर्यलोकम् ।

---

1. निपितेश्च - प्रा-1, प्रा-2
2. मरुद्गुणानां - प्रा-1
3. ब्रह्माणी - अ

ततः सोमलोकम् । ततः वैश्वानरलोकम् । तत इन्द्रलोकम् । ततो ध्रुवलोकम् । ततो भारतलोकम् । ततो वायुलोकम् । ततो विष्णुलोकम् । न च पुनरावर्तते न च पुनरावर्तते इति **प्रत्यहं गतिस्मरणं कर्तव्यम्** ।][1]

[लयकालीनस्थितिः]

जाते ब्रह्मलये ब्रह्मन् भगवान् हरिरीश्वरः ।
चतुर्धा व्यभजज्जीवान् तथा तेषां स्थलानि च ।
पूर्णसाधनसंपन्ना विलिङ्गा दृष्टबिम्बकाः ।
कर्मत्रयविनिर्मुक्ताः स्वरूपेण व्यवस्थिताः ।
विरजायां कृतस्नाना ब्रह्मणा[2] सह सर्वशः ।
ततो दृष्ट्वा शिंशुमारं श्वेतद्वीपं (श्वेतद्वीपे)निरीक्ष्य[3] च ।
विंशति वासुदेवाख्यं हरे रूपं चतुर्थकम् ।
प्रारब्धशेषिणो ये च किञ्चिदूनांश्च साधनैः ।
सलिङ्गान् दृष्टबिम्बांश्च चक्रे संकर्षणोदरे ।
भविष्यद्ब्रह्मणा सार्धमेषां मुक्तिपदं भवेत् ।
तान् सर्वाननिरुद्धस्य कुक्षिगानकरोद् विभुः ।
दीर्घसंसारिणः सृष्टान्[4] प्रद्युम्नस्योदरेऽकरोत्[5] ।

---

1. आवरणाङ्कितो भागः नास्ति - प्रा-1 प्रा-2
2. ब्रह्म - प्रा-1
3. द्वीपेर्निरीक्ष्य - प्रा-1
4. शिष्टान् - अ
5. प्रद्युम्नः स्वोदरेऽकरोत् - अ

वटपत्रपुटे यस्तु संशेते हरिरीश्वरः ।
केवलं तदुदरस्था हि पूर्वमुक्तियुता जनाः ।
चतुर्व्यूहात्मको विष्णुर्वटपत्रशयं हरिम् ।
विशत्यमन्दसान्द्रौचिदानन्दघनो हरिः ।[1]
[उदरावस्थितस्थानविशेषकथनपूर्वकमुक्ता ब्रह्माण्डपुराणे][2]
धामत्रय[3]स्थिता मुक्ताः वटपत्रस्थशौरिणः ।
कुक्षिं गता ध्यानयुता[4] यावत्सृष्टिर्भवेत् पुनः ।
तावत् तिष्ठन्ति चानन्दाः सृष्टौ यान्ति स्वकं स्थलम् ।
तमः प्राप्तास्तामसाश्च स्वरूपेण व्यवस्थिताः ।
लिङ्गभङ्गमनुप्राप्ताः पूर्व[5] द्वेषात्मकाः सदा ।
नाभेरधश्च तिष्ठन्ति दुःखमात्रस्वरूपिणः ।
नाभेरुपरिभागे तु सृतिस्थाः सुप्तिमागताः ।
त्रिवर्गा अपि तिष्ठन्ति यावत् सर्गः पुनर्भवेत् ।
नित्यसंसारिणः सर्वे सृष्टौ सृष्टौ भवन्ति च[6] ।
न तेषां संसृतेर्नाशः क्वचित् क्वापि भविष्यति ।'
[इति लयप्रकरणम् ।

1. विंशत्यमन्द्रसान्द्रौघचिदानन्दघनो हरिः - अ
2. आवरणचिह्नान्तर्गतो भागो नास्ति - प्रा-1 प्रा-2
3. यत्र - अ
4. युक्ताः - अ
5. पूर्ण - प्रा-1 प्रा-2
6. सर्वे सृष्टौ भवति हि - अ

[हरेः नियमनव्यापारनिरूपणम्]

अथ नियतिः -

नियमनं नाम, तत्त्वदेवेषु स्थित्वा तान् प्रेरयित्वाऽस्य प्रेरणम् । तदुक्तम् एकादशस्कन्धतात्पर्ये -

'देहेन्द्रियप्राणधियां त्रिधैव ह्यभिमानिनः ।
तत्रोत्तमा देवतास्ताः सर्वा दुःखविवर्जिताः ।
सुखवन्तः क्रमेणैव ब्रह्माद्या देवता मताः ।
मध्यमा सुखदुःखे ता असुरा अथ मामकाः ।
ते सर्वे दुःखसंयुक्ता दुःखवन्तः क्रमेण तु ।
जीवाभिमानिनश्चैव त्रिविधाः संप्रकीर्तिताः ।
जीवामान्युत्तमो ब्रह्मा मध्यमः स्वयमेव तु ।
अधमः कलिरुद्दिष्टस्तत्र मध्यमनीचयोः
मृतिजन्मक्षुधादुःखप्रभृत्यखिलमेव तु ।
नोत्तमस्य तु जीवस्य देहादेस्तु कथंचन ।
जन्मादिकृतदुःखं तु देहमान्यसुरस्य तु ।
सुखाद्यप्ययजं दुःखम् असुरेन्द्रियमानिनः ।
क्षुन्निमित्तं तु यद्दुःखं प्राणमान्यसुरस्य तु ।
भयतर्षादिजं दुःखं मनोमान्यसुरस्य च ।
सुत्याप्ययजं दुःखम् असुरेन्द्रियमानिनः ।
अतीतादिस्मृतेर्दुःखं चितमान्यसुरस्य तु ।
जीवमान्यप्सु रस्यात् तु सर्वं तत् समुदायतः ।
एवमेव सुखं देवे उभयमध्यमेषु च ।

अयमत्राभिप्रायः -

ब्रह्मा स्वयमेव स्वदेहे एक एव मध्यमाभिमानी । तत्र नोत्तमाधमौ रुद्रादिषु ब्रह्मोत्तमाभिमानी स्वयं मध्यमाभिमानी । एवं मनुष्यदेहेषु द्वौ मध्यमाभिमानिनौ । अधमः कलिः । तत्त्वदेवेषु एते नीचेषु नियन्तारः । मनुष्यदेहेषु ब्रह्मादयः क्रमादुत्तमाभिमानिनः । जीवा मध्यमाभिमानिनः । पुरञ्जनः कल्याद्याः । कलौ तु स्वयं मध्यमाभिमानी । ब्रह्मा तु ब्रह्मोत्तमः। एवं द्वावभिमानिनौ । तदितरत्राभिमानिनस्त्रिविधाः । सर्वेषां लक्ष्मीनारायणौ नियन्तारौ । इति नियमनम् ।

अथ ज्ञानं निरूप्यते -

[ईश्वरज्ञान-लक्ष्मीज्ञानादिभेदेन ज्ञाने चातुर्विध्यम्]

ज्ञानं चतुर्विधम् - ईश्वरज्ञानं, लक्ष्मीज्ञानं, योगिज्ञानं[1] चेति । तत्र सर्वार्थविषयम् ईश्वरज्ञानम् । नियमेन यथार्थम् । तत्स्वरूपमनादिनित्यं स्वतन्त्रं निरतिशयं स्पष्टं च । ईश्वरे त्वसार्वत्रिक अन्यत्र अनालोचनेऽपि सर्वं विषयं लक्ष्मीज्ञानम् । तत्स्वरूपमनादि नित्यं च । योगप्रभावलब्धातिशयं योगिज्ञानम् । तत् त्रिविधम् । ऋजुज्ञानं तात्त्विकयोगिज्ञानम्, अतात्त्विकयोगिज्ञानं चेति। ऋजवो ब्रह्मत्वयोग्यजीवाः । ईश्वरादन्यत्र आलोचने सर्वं विषयम् । तद् द्विविधम् । स्वरूपं मनोवृत्तिरूपं चेति । तत्र स्वरूपमनादि नित्यं योगप्रभावादामुक्ते व्यक्त्यतिशयोपेतं मुक्तावेकप्रकारम् । वृत्तिज्ञानं तु प्रवाहतोऽनादि । योगानुगृहीतप्रत्यक्षादिजन्ममुक्तौ तु नास्त्येव । द्वयमपि नियमेन यथार्थम् । तद्व्यतिरिक्ताः तदभिमानिनो देवाः सात्त्विकाः ।

---

1. अयोगिज्ञानं - अ

अनादिनित्यत्वे सति ईश्वरादन्यत्र आलोचनेऽपि सर्वविषयं तज्ज्ञानम्। तदपि स्वरूपं बाह्यं चेति द्विविधम् । तस्यानादित्वादि पूर्ववत् । स्वरूपं यथार्थमेव । बाह्यं कदाचिदयथार्थमपि तदतिरिक्तदेवादयो योगिनोऽत्ता-त्त्विकाः । सत्त्वे सति ईश्वरादन्यत्र अल्पज्ञानं युक्तं तज्ज्ञानम् । तदपि पूर्ववद् द्विविधम् । स्वरूपस्य सादित्वं व्यक्त्यपेक्षया । अन्यस्य प्रवाहो-त्पत्त्यपेक्षया । याथार्थ्यनियमादि पूर्ववत् । तद्व्यतिरिक्तजीवाः अयोगिनः। ईश्वरादन्यत्राज्ञानं प्रचुरितज्ञानम् अयोगिनेऽपि । त्रिविधा मुक्तियोग्याः । नित्यसंसारिणस्तमोयोग्याश्च। तत्र मुक्तियोग्यानां स्वरूपज्ञानं यथार्थ-मेव । संसारिणां तु मिश्रम् । अन्येषाम् अयथार्थमेव । बाह्यं तु त्रयाणाम् उभयविधमेवेति । एतादृशज्ञानप्रेरकः श्रीनारायणः

अथ ध्यानम् -

गीताप्रणवकल्पतन्त्रसारवाक्यानामयं संप्रदायार्थः -][1]

[ध्यानपद्धतिः]

अथ ध्यानम् -

अधिकारी मुमुक्षुः सम्यङ् नद्यादौ स्नात्वा एकान्ते कुशाजिन-वस्त्ररूपमृदुभूतासने[2] पद्मस्वस्तिकादिशरीरासनेनोपविश्य[3] भूतोच्चटनादि

---

1. आवरणान्तर्गतो भागः नास्ति - प्रा-1 प्रा-2
2. मृद्वासने - प्रा-1 प्रा-2
3. स्वस्तिकवीराद्यासने उपविश्य - प्रा-1 प्रा-2

धाररूपिणीं लक्ष्मीं ततः, विष्णुकूर्मतत्पुच्छाश्रितं पञ्चभूतावशं पृथिवीं दुपरि क्षीरसागरं, तस्मिन् वरुणं , तस्मिन् रमारूपं, श्वेतद्वीपं, तन्मध्ये । मध्येऽष्टदलं पद्मं तदुपरि सूर्यमण्डलम् । तदुपरि सोममण्डलम्, तदुपरि कोणमग्निमण्डलं तज्ज्वालायां रमारूपं दिव्यरत्नमयं मण्टपं, तन्मध्ये व्यरत्नखचितसुवर्णमयपीठं ध्यात्वा अत्र पूजावरणादौ देवपूजकयोर्मध्ये गः प्राची ज्ञेया । आग्नेयादिविदिक्षु देवपीठादौ भागे चतुर्षु क्रमात् गरुडं द्व्यासं सरस्वतीं दुर्गां च ध्यायेत् । चतुर्षु पीठपादोर्ध्वभागेषु धर्माधिपतिं भतनुं यमं तथा ज्ञानाधिपतिं कृष्णवर्णं गजाकारम् इन्द्रं च ध्यायेत् । ठस्य फलकेषु प्राच्यादिचतुर्दिक्षु अधर्मादिपतिं निर्ऋतिम् अज्ञानाधिपतिं र्गाम् अवैराग्याधिपतिं कामम् अनैश्वर्याधिपतिं च ध्यायेत् । पीठोपरि कोणम् अष्टदलं रमारूपं पद्मं ध्यायेत् । आग्नेयत्रिकोणेषु सूर्यसोम- ाशनादिरूपाः पूज्याः । पृष्ठस्थितत्रिकोणेषु श्रीभूदुर्गाभागाः ध्येयाः । ाष्टदलेषु कर्णिकायां च विमलाद्या ध्येयाः ।

विमलोत्कर्षिणी ज्ञानक्रियायोगात् तथैव च ।
प्रह्वी सत्या तथेशानाऽनुग्रहा चेति मूर्तयः ।

- इत्युक्त्या परमात्मस्वरूपभूतनवशक्तीः ध्यायेत्। द्वात्रिंशत्केसरेषु मं ध्यायेत् । तत्कर्णिकायां चित्रासनरूपां ध्यायेत् । तदुपरि वितानदेवतां यं कशिपुदेवताम् । उपबर्हणदेवतां दुर्गां ध्यायेत् । चतुर्दिक्षु आत्मा- तरात्मा परमात्मा ज्ञानात्मानश्च सोपानदेवता ध्येयाः। एवं ध्यात्वा तत्र रूपहृदये स्वरूपाङ्गुष्ठपरिमितं बाह्यदेहे बाह्याङ्गुष्ठपरिमितम् पृष्ठदेशे त्कमलमध्यव्यापिनं प्रादेशपरिमितं तदधः कर्णिकामूलाङ्गुष्ठाग्रप्रमाणां च

वर्णमेघश्यामं वा ध्यायेत् । इदमत्राकूतम् - मध्ये व्यूहबहिर्भूतबिम्बभूतात्मने नमः। 'आत्माऽन्तरात्मेति हरिरेक एव द्विधा स्थितः' ।

'प्रविष्टो हृदये नित्यं रसं पिबति कर्मजम्' इत्युक्तेः । प्राज्ञ इति केचित् । सव्ये लक्ष्म्यै नमः । दक्षिणपार्श्वधरायै नमः । इति प्रथमावरणं तद्बहिः पूर्वादिपूर्वदिक्षु क्रुद्धोल्काय महोल्कावीरोल्काद्युक्तान् भगवद्रूप-विशेषान् पूजयेत् । चतुष्कोणेषु सहस्रोल्कं पूजयेत् । इति द्वितीया-वरणम् ।

तद्बहिश्चतुर्दिक्षु वासुदेवसंकर्षणप्रद्युम्नानिरुद्धान् कोणेषु मायाजया-कृतिः शान्तिः पूजयेत्(?) इति तृतीयावरणम् ।

तद्बहिः पूर्वकेशवादि आग्नेये विष्ण्वादि दक्षिणे त्रिविक्रमादि नैर्ऋत्ये पद्मनाभादि पश्चिमे संकर्षणादि वायव्ये पुरुषोत्तमादि उत्तरे नरसिंहादि ईशान्ये हर्यादि । इदं चतुर्थम् ।

तद्बहिः पूर्वे मच्छं(मत्स्यं?) कूर्मम् आग्नेये वराहं दक्षिणे नारसिंहं वामनम् । नैर्ऋत्ये भार्गवं पश्चिमे राघवं कृष्णं वायव्ये बुद्धं उत्तरे कल्किनम् अनन्तम् ईशान्ये विश्वरूपम् इति पञ्चमम् ।

तद्बहिर्दिक्षु कोणैश्च अनन्तं वारुणीं ब्रह्माणं गायत्रीं वायुं भारतीम् ईशं गिरिजां च पूजयेत् । देवस्याग्नेरी शं तद्वामे सौपर्णी(र्णं?)च पूजयेत्। इति षष्ठावरणम् ।

तद्बहिः इन्द्राय साङ्गाय ऐश्वर्याधिपतये सवाहनाय सायुधाय सपरि-ग्रहाय शचीपतये विष्णुपार्षदाय नमः ।एवमुत्तरत्र ।आग्नेये तेजोऽधिपतये स्वाहापतये दक्षिणे यमाय धर्माधिपतये श्यामलासहिताय नैर्ऋत्ये रक्षोऽधिपतये कालिकासहिताय पश्चिमे वरुणाय जलाधिपतये गङ्गासहिताय वायव्ये

ज्ञानाधिपतये वायवीसहिताय उत्तरे सोमाय नक्षत्राधिपतये रोहिणीसहिताय ईशान्ये ईशाय भूताधिपतये पार्वतीसहिताय नैर्ऋतिवरुणयोर्मध्ये शंशेषाय नागाधिपतये वारुणीसहिताय इन्द्रेशानयोर्मध्ये सरस्वतीसहिताय ब्रह्मणे हंसवाहनाय कुशदध्रभयाक्षमाल्पगौरवर्णाय नमः । इति सप्तावरणम् ।

एतादृशावरणसहितं परमात्मानं ध्यायेत् ।][1]

[तत्र पीठदेवताः परदेवताद्याः आवाह्य पीठोपरि षट्कोणपद्मभूमिं ध्यात्वा कोणेषु देवस्य अग्रे अग्निं दक्षिणे सूर्यं सव्ये चन्द्रमसं देवस्य सव्ये श्रियं दक्षिणे भुवं पृष्ठभागे दुर्गां ध्यात्वा तत्र षट्कोणभूमौ अष्टदलपद्मं रमारूपं ध्यात्वा तत्र पद्मदलेषु सूर्यं केसरेषु सोमं कर्णिकायां हुताशनं ध्यात्वा प्रत्येकं पद्माष्टदलेषु मध्ये कर्णिकायां च -

विमलोत्कर्षिणी ज्ञानक्रिया योगा तथैव च ।
प्रह्वी सत्या तथेशानाऽनुग्रहा चेति शक्तयः ।

- इत्युक्तपरमात्ममूर्तिं ध्यात्वा । कर्णिकोपरि तत्स्वरूपभूत-नवशक्ती[2]र्ध्यात्वा आत्माऽन्तरात्मा परमात्मा ज्ञानात्मनश्च सोपानदेवताः। परमात्ममूर्तिं ध्यात्वा कर्णिकोपरि तमो रजः सत्त्वमिति क्रमेण त्रिगुणाभि-मानिनीं लक्ष्मीं ध्यात्वा तल्पाकारं छत्राकारिणं[3] शेषं ध्यात्वा तदुपरि गुण-त्रयाभिमानिनी चित्रासनरूपां लक्ष्मीं ध्यात्वा तत्र स्वरूपहृदये स्वरूपाङ्गुष्ठ-परिमितबाह्यहृदये बाह्याङ्गुष्ठपरिमितं तत्पृष्ठभागे हृत्कमलमध्यव्यापिनं प्रादेशपरिमितं तदधः कर्णिकामूले अङ्गुष्ठाग्रप्रमाणं च परमात्मानं नारायण-

---

1. आवरणचिह्नान्तर्गतो भागः नास्ति - प्रा-1 प्रा-2
2. शक्ति - प्रा-1
3. छत्राकारणं - प्रा-1 प्रा-2

मनामयेत्याद्युक्तप्रकारेण लक्ष्मीधराभ्यामित्यादितन्त्रसारोक्तावरणदेवता-सहितम् उद्यदादित्यवर्णं मेघश्यामं ध्यायेत् ।

तदुक्तम् -

एकान्ते तु शुचौ देशे जनसम्मर्दवर्जिते ।
कुशाजिनाद्यासनगः स्वस्थचित्तः स्थिरः शुचिः ।
सम[1]कायशिरोग्रीवः[2] धारयन्नचलं मनः ।
संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ।][3]
अष्टपत्रे[4] तु हृत्पद्मे मध्ये सूर्येन्दु[5] वह्निगम् ।
पीठं तन्मध्यपद्मस्थं[6] नारायणमनामयम् ।
उद्यदादित्यसंकाशं तेजसाऽनुपमं सदा ।
सहस्रेणापि सूर्याणां सद्ज्ञानानन्दरूपिणम् ।
अतिरक्ततलं[7] भास्वन्नख[8]व्रातविभूषितम् ।
वृत्तजङ्घं वृत्तजानुं हस्तिहस्तोरुमीश्वरम्[9] ।

---

1. समं - प्रा-1 प्रा-2
2. ग्रीवं - प्रा-1 प्रा-2
3. आवरणचिह्नान्तर्गतो भागः नास्ति - अ
4. अष्टपत्रं - प्रा-1 प्रा-2
5. सूर्यन्दु - प्रा-1
6. पीठतन्मध्यमध्यस्थं - अ
7. फलं - अ
8. भास्व नख - प्रा-1 भास्वं नाख - प्रा-2
9. हस्तिस्तोरुमीश्वरम् । प्रा-2

महाकटितटे नद्ध[1]काञ्चीपीताम्वरोज्ज्वलम् ।
निम्ननाभिं सत्रिवलिं संवृतोदरवन्धनम् ।
विस्तारवक्षसि[2] भ्राजत्कौस्तुभामुक्त[3]कन्धरम् ।
वनमालाधरं हारवैजयन्त्या विभूषितम्[4] ।
पृथुदीर्घचतुर्बाहुं शङ्खचक्रगदाम्वुजैः ।
युक्तमुन्निद्रपद्माक्षं स्फुरन्मकरकुण्डलम् ।
पूर्णचन्द्रायुतोद्रिक्त[5] कान्तिसन्मुखपङ्कजम् ।
सुभ्रुवं सुललाटं तं[6] किरीटाबद्धमूर्धजम् ।
निःशेषदुःखशमनं नित्यानन्दशुचिस्मितम् ।
[इत्यादि प्रणवकल्पोक्तप्रकारेण ध्यायेत् ।
अनन्तसूर्यदीधितिर्दुरन्तसद्गुणार्णवः .
सहस्रसूर्यमण्डलो ज्वलत्किरीटमूर्धजः ।
सुनीलकुन्तलावृतामितेन्दुकान्तिसन्मुखः
सुरक्तपद्मलोचनः सुविद्युदाभकुण्डलः ।।
सहासविद्रुमाधरः समस्तदेववाग्रसः ।
दिवाकरौघकौस्तुभप्रभासकारु(चारु?)कन्धरः ।

---

1. मह्राकटितटोन्नद्यां - प्रा-1 प्रा-2
2. विस्तारवक्षसं - प्रा-1 प्रा-2
3. मुक्ति - प्रा-1 प्रा-2
4. वैजयन्त्यादिभिर्वृतम् - अ
5. पूर्णचन्द्रायुतोद्रिक्तं - अ
6. सललाटीन - प्रा-1 प्रा-2

सुपीवरोन्नतोल्लसज्जगद्धरांसयुगमकः ।

सुवृत्तदीर्घपीवरोल्लसद्भुजद्वयाङ्कितः ।

उदारबाहुभूषणः शुभागदः सुकङ्कणो

महाङ्गुलीयभूषितस्सु [र]क्तसत्कराम्बुजः ।

अनर्घ्यरत्नमालया वनाख्यया च मालया विलासिविस्तृतो रसा बभार च श्रियं प्रभुः ।

प्रभूतिवत्सभूषणस्तनूदरे वलित्रयी

उदारमध्यभूषणोल्लसत्तटित्प्रभास्वरः[1] ।

करीन्द्रसत्करोरुयुक् सुवृत्तजानुमण्डलः

क्रमाल्पवृत्तजङ्घकः सुरक्तपादपल्लवः ।

लसद्धरिन्मणिद्युती रराज राघवोऽधिकम् - इति वा ध्यायेत्।][2]

द्वात्रिंशल्लक्षणानि च ध्येयानि । तथा हि[3] -

भुजनेत्रहनुजानु[4] नासास्थानेषु पञ्च सुदीर्घानि ।

दीर्घाणि ।

त्वक्केशाङ्गुष्ठ[5] दन्ताङ्गुलिपर्वसु पञ्च सौक्ष्म्याणि[6] ।

---

1. प्रभांवरः - अ
2. आवरणान्तर्गतो भागः नास्ति - प्रा-1 प्रा-2
3. 'तथा हि'- नास्ति - अ
4. भुजनेत्रानूजानु - प्रा-1 प्रा-2
5. त्वक्केशाङ्गुलि - अ
6. सूक्ष्माणि - प्रा-1 प्रा-2

पाणिपादनेत्रान्ते तालुस्थाने जिह्वायाम् अधरोष्ठे नखेषु सप्तस्थानेषु रक्तत्वानि[1] ।

कक्षकुक्षिवक्षोघ्राणस्कन्धललाटेषु औन्नत्यम्[2] ।

ललाटकटिवक्षःसु त्रिषु स्थानेषु पृथुत्वादीनि[3] ।

ग्रीवाप्रजननपृष्ठेषु[4] ह्रस्वत्वानि[5] । स्वरसत्त्वनाभिषु (स्वरसनाभिषु) त्रिषु स्थानेषु[6] गम्भीरत्वानि[7] ।

तथा चोक्तं लक्षणग्रन्थे -

पञ्च दीर्घः[8] पञ्च सूक्ष्मः पञ्चरक्तः[9] षडुन्नतः ।
त्रिपृथुर्लघुगम्भीरो द्वात्रिंशल्लक्षणानि तु ।

अत्र लघुशब्दो हि स्वार्थो ज्ञेयः[10] । तथा दक्षिणकरे सहस्रारं चक्रम्[11] अष्टास्रा गदा,[12] शतावर्तशङ्खवत्त्वं च लक्षणं ज्ञेयम्[13] ।

---

1. रक्तानि - प्रा-1 प्रा-2
2. चौन्नत्यम् - अ
3. पृथुलानि - प्रा-1 प्रा-2
4. ग्रीवाप्रजनन पृष्ठे जङ्घेषु - प्रा-1 प्रा-2
5. ह्रस्वानि - प्रा-1 प्रा-2
6. 'त्रिषु स्थानेषु'- नास्ति अ
7. गभीरत्वम् - अ
8. 'पञ्चदीर्घः' नास्ति - अ
9. सप्तरक्तः - प्रा-1 प्रा-2
10. अत्र लघुशब्दाद् ह्रवार्थो ज्ञेयः ।- प्रा-1 प्रा-2
11. सहस्रारचक्रम् - अ
12. अष्टास्राङ्ग - प्रा-1 प्रा-2
13. शतावर्तशङ्खचक्रलक्षणत्वेन ज्ञेयम् । - प्रा-1 प्रा-2

वामकरे सहस्रदलपद्मं च लक्षणत्वेन ज्ञेयम्[1] ।

पादतलयोः वज्राङ्कुशध्वजपद्मरेखा ध्येयाः ।

हृदये ध्येयमूर्तयः तिस्र उक्ताः । तथा चोक्तं बृहद्भाष्ये[2] -

सहस्रारेण चक्रेण चिह्निता दक्षिणे करे ।

गदयाऽष्टाश्रया चैव शतावर्तेन कम्बुना ।

वामकरे तथाऽब्जेन सहस्रदलशोभिता इति ।

भागवते च -

'संचिन्तयेद् भगवतश्चरणारविन्दं

वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्यम् ।

उत्तुङ्गरक्तविलसन्नखचक्रवाल-

ज्योत्स्नाभिराहतमहद्धृदयान्धकारम् ।' -इत्यादि ।

[हृदये सर्वशो व्याप्तः प्रदेशः[3] पुरुषोत्तमः ।

जीवानां स्थानमुद्दिष्टः सर्वदेवः सनातनः ।

हृत्कर्णिकामूलगतः सोऽङ्गुष्ठाग्रप्रमाणकः[4] ।

मूलेश इति[5] नामास्मिन् सर्वे जीवाः प्रतिष्ठिताः ।

---

1. वामकरे सहस्रदलं पद्मलक्षणत्वेन च ज्ञेयम् । - अ
2. अत्र प्रा-1, प्रा-2 प्रत्योः वाक्यद्वयस्थानं विपरिवर्तितं दृश्यते यथा-तथा चोक्तं बृहद्भाष्ये । हृदये ध्येयमूर्तयः तिस्र उक्ताः ।
3. व्यापिप्रादेशः - प्रा-1 प्रा-2
4. हृत्करणिकामूलगतः सोऽङ्गुष्ठाग्रप्रमाणतः । - अ
5. ..मूलेन - अ

अङ्गुष्ठमात्रे पुरुषे कर्णिकाग्रस्थिते हरौ ।
प्रविशन्ति सुषुप्तास्तु प्रबोधन्ते ततस्तथा[1] ।
सोऽयं[2] त्रिरूपो[3] भगवान् हृदयाख्यः प्रकीर्तितः' - इति ।
- इदं च यावत्कालं ध्यानवशात् हृदये वासनामयी मूर्तिः[4] -
प्रतीयैवैतत्कालं ध्यानन्यासं कुर्यात्[5] ।
वासनामयप्रतीत्यनन्तरं[6] तस्यां[7] प्रतिमायां वासनामय्याम्[8]

[मधुपर्कपुनराचमन पुनः स्नानवसनविभूषण उपवीतासन][9] गन्धपुष्प-धूपदीपनैवेद्यनमस्कारादिना मनसा कल्पितेन अनवद्योदकस्नान[10] पूजां कृत्वा तत्प्रतिमान्तर्गतविष्णौ पूर्णसच्चिदानन्दात्मकः निर्दोषपूर्णस्वामी पूर्णगुण इति ध्यानं कुर्यात्[11] ।

---

1. प्रविशन्ति सुपुप्तौ तु प्रबुध्यन्ते ततस्तथा । - अ
2. सोऽहं - अ
3. विरूपो - प्रा-1 प्रा-2
4. यावत्कालध्यानवशात् हृदयवासनामूर्तिः - अ
5. प्रतीत्य देवतावत् कालं ध्यानं कुर्यात् - प्रा-1 प्रा-2
6. वासनामूर्ति(र्त्य?)नन्तरं - अ
7. तस्याः - प्रा-1 प्रा-2
8. वासनामयार्चापाद्याचमनीय - अ
9. आवरणान्तर्गतो भागः नास्ति - प्रा-1 प्रा-2
10. 'अनवद्योदकस्नान' नास्ति - अ ;
    गन्धपुष्पादिभिः मनसा संकल्पितैः - प्रा-1 प्रा-2
11. पूर्णसच्चिदानन्दात्मको निर्दोषः । पूर्णस्वामिन् पूर्णगुण इति ध्यानं कुर्यात् - प्रा-1 प्रा-2

इदं तु यावत्स्वरूपज्ञगुरुदर्शनं तावत्पर्यन्तं कुर्यात्[1] ।

पश्चात् तादृशगुरूक्तप्रकारेण यावदपरोक्षं ध्यानं कुर्यात्[2] ।

ध्यानसमाप्त्यनन्तरं संपुटाकारेण मातृकान्यासतत्त्वन्यासौ[3] कृत्वा ध्यानं हरौ समर्पयेत् ।

आन्तरदीक्षा तु सर्वदा कार्या[4] ।

'हरिः सर्वेष्टदाता मे सर्वानिष्टनिवारकः[5] ।

सर्वोत्कृष्टोऽयमेवैकः तदीयोऽहं स मे पतिः ।।' इति।

पूजायामयं विशेषः -

'सस्नुषा तु हरेर्लक्ष्मीः स्नानं कारयति प्रभोः ।

[पीताम्बरं तु गरुडो आसनं शेष एव च ।

इन्द्रस्तु कलशं गोपीचन्दनं मन्मथस्तथा ।

रुद्रस्तु शङ्खचक्रादिधारणाय जगत्पतेः ।

आदर्शं तु ततो दद्यात् सूर्यचन्द्रौ रमापते ।

श्रीगन्धे तु श्रियं विद्यात् भूदेवीमक्षतं[6] स्मरेत् ।

दुर्गामङ्गारके विद्यात् वैजयन्त्यां सदाशिवम् ।

---

1. इदं च यावत्स्वरूपज्ञदर्शनं तावत्पर्यन्तं कुर्यात् । - अ
2. पश्चाद् दृशौ उक्तप्रकारेण यावदपरोक्षज्ञानं कुर्यात् । - अ
3. मातृकं त.वन्यासं । - प्रा-1 प्रा-2
4. अन्तरदीक्षा तु सदा कार्या । - प्रा-1 प्रा-2
5. अयं सर्वेष्टदाता मे सर्वारिष्टनिवारकः। -अ
6. मक्षतरं -अ

वायुं तु वनमालायां लक्ष्मीं श्रीवत्सके तथा ।
पादुके तु मरुद्देवः कौस्तुभे तु मरुत् स्मृतः ।
शङ्खं तु कटिसूत्रे कुण्डले शेष एव च ।
पूजाकाले तु देवस्य इति हि ध्येयमञ्जसा ।
कीर्तनं मानसं ध्यानं क्रमात् संपद्यते यदि ।
तर्ह्येव[1] संसृतेर्मोक्षो नान्यथा[तु कथंचन] ।
श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।
इत्येवं नवविधभक्तिः क्रमात् संपद्यते यदि ।
तर्ह्येव संसृतेर्मोक्षो नान्यथा तु कथंचन ।
जीवाभेदो निर्गुणत्वम् अपूर्णगुणता तथा ।
साम्याधिक्ये तथाऽन्येषां भेदस्तद्गत एव च ।
प्रादुर्भावं विपर्यासस्तद्भक्तद्वेष एव च ।
तत्प्रमाणस्य निन्दा च द्वेषा एतेऽखिला मताः ।
एतैर्विहीना या भक्तिः सा भक्तिरिति निश्चिता ।][2]
जीवेशयोर्भिदा चैव जीवभेदः परस्परम् ।

---

1. तह्येव - अ
2. आवरणान्तर्गतो भागः नास्ति - प्रा-1 प्रा-2 ;
एतदनन्तरमयं भागः अधिकः -प्रा-1 तथा प्रा-2 प्रत्योः :-
लक्ष्मीधराभ्यामाश्लिष्टं स्वमूर्तिगणमध्यगम् ।
ब्रह्मवायुब्रह्मवायुशिवाहीशविपैः शक्रादिकैरपि ।
सेव्यमानोऽधिकं भक्त्या नित्यनिःशेषशक्तिमान् ।

जडेशयोर्जडानां च जडजीवभिदा तथा ।
पञ्च भेदा इमे नित्याः सर्वावस्थासु सर्वशः ।

[अत्र जीवत्वं नाम अस्वतन्त्रचेतनत्वविवक्षया लक्ष्म्या जीवकोटौ निवेशाङ्गीकारेण जीवेशयोर्भेदेनैव ईश्वरलक्ष्म्या भेदः प्राप्तः । लक्ष्मीजीवानां भेदस्तु पूर्वोक्तभेदेनैव विवक्षया जीवानां परस्परभेदनिरूपणेन तस्याः ईश्वर-कोटौ निवेशाद्वा संभवतीति न कश्चित् क्षुद्रोपद्रव इति रहस्यम्।

'शृण्वन् सुभद्राणि रथाङ्गपाणेर्जन्मानि कर्माणि च यानि लोके ।
गीतानि नामानि तदर्थकानि गायन् विलज्जो विचरेदसङ्गः ।'

[1]तरवः किं न जीवन्ति भस्त्राः किं न श्वसान्त्युत ।
न खादन्ति न मेहन्ति किं ग्राम्याः पशवोऽपरे ।
श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः ।
न यत्कर्णपथोपेतो जातु नाम गदाग्रजः ।
बिले बतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नरस्य ।
जिह्वासती दार्दुरिकेव सूत न चोपगायत्युरुगायगाथाः ।
भारः परं पट्टकिरीटजुष्टमप्युत्तमाङ्गं न नमेन्मुकुन्दम् ।
शावौ करौ नो कुरुते सपर्यां
हरेर्लसत्काञ्चनकङ्कणौ वा ।
बर्हायिते ते नयने नराणां
लिङ्गानि विष्णोर्न निरीक्षतो ये ।
पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ ।
जीवच्छवो भागवताङ्घ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु ।

1. भागवतम्, 2.30/191

श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसच्छवो यस्तु न वेद गन्धम् ।
तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः ।
न विक्रियेताथ मुखे विकारो नेत्रे जलं गात्ररुहेषु हर्षः ।][1]
भगवद्ज्ञानभोगाभ्यां[2] निवृत्तसमस्तानिष्टकर्मणः
स्वोत्तमोपदेशेन ब्रह्मनाड्यौ[3] क्रमेण वा ।

[मोक्षनिरूपणम्]

परित्यक्तदेहाः स्वोचितेनार्चिरादिना वा पथा वैकुण्ठवासिनं[4] भगवन्तं हिरण्यगर्भेण सह प्राप्ता भिन्नलिङ्गशरीराः विध्वस्त[5] प्रकृत्यन्तनिवृत्तानिष्टाः[6]

सम्यगाविर्भूतानन्दादिगुणाः भगवत्समीप एव तमुपासीनाः[7] [स्वरूपेण लीलागृहीतविग्रहैर्वा संकल्पमात्रसाध्यान् दिव्यभोगान् तारतम्येन भुञ्जानाः][8] न कदाचित्[9] पुनरावर्तन्त इत्येतन्मोक्षस्वरूपम् ।

[अज्ञानां हि रहस्याभिप्रायेणात्रोदितानि वै ।
अनाख्येयान्यभक्तेभ्यः श्राव्याण्याव सभक्तिभिः ।

1. आवरणान्तर्गतो भागः नास्ति - प्रा-1 प्रा-2
2. भगवान् भोगाभ्यां - प्रा-1 प्रा-2
3. नाड्योप्रा-1 ; सोत्तमप्रवेशेन ब्रह्मनाड्यो क्रमेण वा - अ
4. वैकुण्ठ-लोकवासिनं - प्रा-1 प्रा-2
5. विध्वंस - प्रा-1
6. प्रकृतयोऽत्यन्तनिवृत्तानिष्टाः - प्रा-1 प्रा-2
7. सततमुपासीनाः - प्रा-1 प्रा-2
8. आवरणान्तर्गतो भागः नास्ति - प्रा-1 प्रा-2
9. च - प्रा-1 प्रा-2

कलौ युगे महाघोरे पुण्यविप्लवकारिणि ।
क्वचित् क्वचिदिदं लक्ष्यं सद्योभक्तिकरं हरौ ।
मन्दभाग्यैः कथं लभ्यं कथं चात्रादरो भवेत् ।
श्रीविष्णुमायासामर्थ्यात् शास्त्रे भागवते पुनः ।
द्वेष एवाधिको नित्यं नैव तत्रादरो भवेत् ।
यथा यथा कालवृद्धिस्तथा तथा भवेद् ध्रुवम् ।
उच्छेदो विष्णुशास्त्राणां तद्विरुद्धः प्रवर्तते ।
विष्णुभक्ताय शान्ताय धर्मिष्ठाय मुमुक्षवे ।
आख्येयमादरेणैव नैवाख्येयमनादृते ।
यत् फलं सर्वतीर्थे स्यात् सर्वयज्ञैश्च यत् फलम् ।
सर्वदानैश्च कर्मभिश्च यद् यत् कालेन लभ्यते ।
सकृत् श्रवणतश्चास्य कीर्तनात् स्याच्च तत्फलम् ।
अन्ते मुक्तिमवाप्नोति यतो नावर्तते पुनः ।
पितृतॄर्णमुत्तीर्णमनेन तूर्णं
देवर्णमत्र्येति नरोऽवतीर्णः ।
कृतं च कर्तव्यमनेन पूर्णं
यो विष्णुगाथाश्रवणादरः स्यात् ।
नमस्तस्मै भगवते व्यासायामिततेजसे ।
येन प्रवर्तितो दीपो दिव्यज्ञानमयो महान् ।][1]

---

1. आवरणान्तर्गतो भागः नास्ति - प्रा-1 प्रा-2

श्रीनिवासाख्यविदुषा रचितस्तत्त्वसंग्रहः ।
मध्वादिसद्गुरूणां च प्रीत्यै भवतु सर्वदा ।

।। इति श्रीरवणगाविवित्रि(तिरु?) मलाचार्याचार्यसुत
श्रीनिवासाचार्यकृतस्तत्त्वसारसंग्रहः समाप्तः[1] ।।

श्रीः श्रीः

(ग्रन्थान्ते एते श्लोका दृश्यन्ते :-

सुरनरदितिजेन्द्रैः सेव्यते योऽस्ततन्द्रै-
रुरुतरदुरितानां का कथा मानवानाम्?
स भुवि सुकृतकर्ता वाञ्छितावाप्तिहेतुः
जयति विजितरागः तीर्थराजः प्रयागः ।

श्रुतिः प्रमाणं स्मृतयः प्रमाणं
पुराणमप्यत्र परं प्रमाणम् ।
यत्रास्ति गङ्गा यमुना प्रमाणं
स तीर्थराजो जयति प्रयागः ।

न यत्र योगाचरणप्रतीक्षा
न यत्र यज्ञाग्निहविःसुदीक्षा ।
न तारकज्ञानगुरोरपेक्षा
स तीर्थराजो जयति प्रयागः ।

चिरं निवासं न समीक्ष्यते यो
उदारचित्तः प्रददाति कामान् ।
यः कामितार्थाश्च ददत् सकामान्
स तीर्थराजो जयति प्रयागः ।

---

1. इति तत्त्वसारसंग्रहः संपूर्णः । - प्रा-1 प्रा-2



प्राच्यविद्यासंशोधनालयः, मैसूरु विश्वविद्यानिलयः, मैसूरु-570005